M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 152

Title: Tatvanam Sandhanam

732

तत्त्वानुसंधानम्

		Tatvānusandhānam	Title
		Mahadeva Saraswati	Author
			Editor
			Year, Vols.
			Publisher
732			Remarks

श्रीगणेशायनमः ब्रह्माहंयत्प्रसादेनमयिविश्वंप्रकल्पितं श्रीमत्स्वयंप्रकाशाख्यंप्रणोमिजगतांगुरुं १ देहोनाहंश्रोत्रवागादिकानिनाहंबुद्धिर्नाहम
ध्यासमूलं नाहंसत्यानंदरूपश्चिदात्मामायासाक्षीकूटस्थएवाहमस्मि २ अथमोक्षस्यवाक्यार्थज्ञानाधीनत्वात्तस्यचपदार्थज्ञानाधीनत्वात्तदर्थंतत्पदार्थं
निरूपयामः तत्पदार्थस्यलक्षणंद्विविधं॰ तटस्थलक्षणंस्वरूपलक्षणंचेति॰ सृष्टिस्थितिलयकारणत्वंतटस्थलक्षणंयतोवाइमानिभूतानिजायंतेयेनजातानि
जीवंतियत्प्रयंत्यभिसंविशंतीतिश्रुतेः तदुक्तंभगवतासूत्रकारेण॰ जन्माद्यस्यइति॰ सत्यज्ञानानंदंस्वरूपलक्षणं॰ सत्यंज्ञानमनंतंब्रह्मआनंदोब्रह्मेतिव्य
जानादितिश्रुतेः उक्तंचआनंदादयःप्रधानस्येतिसचद्विविधः वाच्यार्थोलक्ष्यार्थश्चेति॰ मायोपहितंचैतन्यंतत्पदवाच्यार्थः मायाविनिर्मुक्तंचैतन्यं
तत्पदलक्ष्यार्थः अथकेयंमायाशृणु॰ यथाशुक्त्यादौरजतादिकल्पितंयथाचैतन्येचैतन्यंकल्पितं॰ इदंसर्वंयदयमात्मैवेदंसर्वंपुरुषएवेदंविश्वंस
र्वखल्विदंब्रह्मवासुदेवःसर्वंनारायणःसर्वमिदंपुराणइत्यादिश्रुतिस्मृतिवाक्यशतेनचैतन्यस्यचैतन्यव्यतिरेकेणाभावप्रतिपादनाच्चैतन्याचैत
न्ययोरभेदायोगाच्चचैतन्यंनित्यशुद्धमुक्तसत्यपरमानंदाद्वयंब्रह्मेत्याद्यनंतविशेषणं॰ अचेतनमज्ञानादिजडजातं॰ अज्ञानंत्रिगुणात्मकंस
दसद्भ्यामनिर्वचनीयंभावरूपज्ञाननिवर्त्यंअहंब्रह्मनजानामीत्यनुभवात्॰ देवात्मशक्तिंस्वगुणैर्निगूढामित्यादिश्रुतेः अज्ञानेनावृतंज्ञानं

तेन मुह्यंति जंतवः ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन इति स्मृतेश्च· तच्चाज्ञानं द्विविधं· मायाविद्याभेदात्· शुद्धसत्वप्रधानं सन्मायेत्यु
१ च्यते· मलिनसत्वप्रधानं सदविद्येत्युच्यते· जीवेशावाभासेन करोतीति माया चाविद्या च स्वयमेव भवतीति श्रुतेः अथवाज्ञानशक्तिर्द्विवि
धा· ज्ञानशक्तिः क्रियाशक्तिश्चेति· रजस्तमोभ्यामनभिभूतं सत्वं ज्ञानशक्तिः सत्वात्संजायते ज्ञानमित्यादिस्मृतेश्च· क्रियाशक्तिर्द्विवि
धा· आवरणशक्तिर्विक्षेपशक्तिश्चेति· रजःसत्वाभ्यामनभिभूतं तम आवरणशक्तिः तदुक्तं· रुद्धं तम आवरणात्मकत्वादिति· सा
च नास्ति न प्रकाशत इति व्यवहारहेतुः तथा चोक्तं· न भाति नास्ति कूटस्थ इत्यापादनमावृतिरिति· तमःसत्वाभ्यामनभिभूतं रजो विक्षे
पशक्तिः रजसो लोभ एव चेति स्मृतेः लोभादीनां विक्षेपत्वं च प्रसिद्धमेव· सा चाकाशादिप्रपंचोत्पत्तिहेतुः उक्तं च· विक्षेपशक्तिर्लिं
गादिब्रह्मांडांतं जगत्सृजेदिति· तथा च पूर्वोक्ताज्ञानमावरणशक्तिप्रधानं प्रधानं सदविद्येत्युच्यते· अज्ञानं विक्षेपशक्तिप्रधानं
सन्मायेत्युच्यते· एतदभिप्राया स्मृतिरपि· तत्वविद्यावितता हृदि यस्मिन्निविशते· योगी मायाममेयाय तस्मै विद्यात्मने नमः इत्येवं
रूपा द्रष्टव्या· एवं च मायोपहितं चैतन्यं ईश्वरो जगत्कारणमंतर्यामीत्युच्यते· स एव तत्पदवाच्यार्थः अविद्योपहितं चैतन्यं जीवः ३

प्राज्ञ इति चोच्यते· तदुक्तं· तमो रजः सत्वगुणा प्रकृतिर्द्विविधा च सा· सत्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते· मायाबिंबो वशीकृ
त्य तां स्यात्सर्वज्ञ ईश्वरः अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधेति· अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः· मायां
तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्येवमादिश्रुतयः उक्ताभिप्राया द्रष्टव्याः यद्वा यथैक एव देवदत्तः क्रियानिमित्तेन पाचकपाठक
इति व्यपदिश्यते· तथैकमेवाज्ञानं विक्षेपावरणशक्तिनिमित्तभेदेन मायाविद्ये च व्यपदिश्यते· तथा चाविद्याप्रतिबिंबितचैतन्यं जीवः अविद्यो
पहितं बिंबचैतन्यमीश्वरः आभास एव चेति· अत एवोपमा सूर्यवत् तथा स्वयंज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्नुपाधि
ना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मा· एक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवदित्यादिश्रु
तिस्मृत्योः सत्वात्· अस्मिन्पक्षे जीव एक एव तस्मिंल्लिंगतः करणविशिष्टाः प्रमातारः बहवः कल्पिताः केचित्तु नानाज्ञानं स्वीकृत्य वन
वृक्षानसमुदायः समष्टिस्तदुपहितं चैतन्यमीश्वरः वृक्षवत्प्रत्येकमज्ञानं व्यष्टिस्तदुपहितं चैतन्यं प्राज्ञ इति वदंति· अन्ये तु कारणीभूताज्ञा
नोपहितं चैतन्यमीश्वरः अंतःकरणोपहितं चैतन्यं जीवः कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इति वचनादित्याहुः सर्वथा मायोपहितं चै

न्यमीश्वरः स च ज्ञानशक्त्युपहितस्वरूपेण जगत्कर्ता विक्षेपादिशक्तिमदज्ञानोपहितस्वरूपेण जगदुपादानमूर्णनाभिवत्॰ यथोर्णनाभिः
सृजते गृह्णाति चेत्यादिश्रुतेः यः सर्वज्ञः स सर्ववित् स हि सर्वस्य कर्तेत्यादिश्रुतिभ्यः एवंभूतादीश्वरादाकाश उत्पद्यते॰ आका
शाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवी च तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिश्रुतेः मायायाः सत्वरजस्तमोगुणा
त्मकत्वात्कार्याण्याकाशादीन्यपि सत्वरजस्तमोगुणात्मकानीत्यपंचीकृतानि सूक्ष्मभूतानीति च वर्ण्यंते॰ एतेभ्यः सूक्ष्मभूतेभ्यः स्थूलभू
तानि सूक्ष्मशरीराणि च सप्तदशलिंगात्मकानि जायंते सप्तदशलिंगानि तु ज्ञानेंद्रियाणि पंच कर्मेंद्रियाणि पंच मनोबुद्धिः पंच प्राणा
श्चेति॰ तथा चाकाशादिसात्विकांशेभ्यो व्यस्तेभ्यो ज्ञानेंद्रियाण्युत्पद्यंते॰ आकाशात्सात्विकांशाच्छ्रोत्रमुत्पद्यते॰ वायोः सात्विकां
शाच्चक्षुः अपां सात्विकांशाद्रसनं॰ पृथिवीसात्विकांशाद्घ्राणं॰ श्रोत्रमाकाशादित्यादिश्रुतेः आकाशादीनां सात्विकांशेभ्यो मिलिते
भ्योंऽतःकरणमुत्पद्यते॰ तत्संकल्पविकल्पनिश्चयाभिमानानुसंधानरूपवृत्तिभेदाच्चतुर्विधं॰ मनो बुद्धिरहंकारश्चित्तं चेति चतुष्टयं॰
संकल्पाख्यं मनोरूपं॰ बुद्धिर्निश्चयरूपिणी॰ अभिमानात्मकस्तद्वदहंकारः प्रकीर्तितः अनुसंधानरूपं च चित्तमित्यभिधीयते इति वा

र्तिककारवचनात्॰ पूर्वोक्ताकाशादिराजसांशेभ्यो व्यस्तेभ्यः कर्मेंद्रियाण्युत्पद्यंते॰ आकाशाद्राजसांशाद्वागिंद्रियमुत्पद्यते॰ वायो राजसां
शात्पाणी तेजसः राजसांशात्पादौ॰ अपां राजसांशादुपस्थः पृथिवीराजसांशात्पायुः आकाशादिराजसांशेभ्यो मिलितेभ्यः प्रा
ण उत्पद्यते॰ सोऽपि वृत्तिभेदात्पंचविधः प्राग्गमनवान्नासाग्रवर्ती प्राणः अर्वाग्गमनवान्पाय्वादिस्थानवर्त्यपानः विष्वग्गमनवा
न्सर्वशरीरवर्ती व्यानः ऊर्ध्वगमनवान्कंठस्थानीय उदानः अशितपीतान्नादिसमीकरणकरोऽखिलशरीरवर्ती समानः वाक्पाणि
पादपायूपस्थानि कर्मेंद्रियाणि तेषां क्रमेणेत्यादिश्रुतेः अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयकोशाः पंचात्रैवांतर्भवंति॰
वक्ष्यमाणस्थूलशरीरमन्नमयकोशः उक्तं सूक्ष्मशरीरं कोशत्रयात्मकं कर्मेंद्रियैः सहितः प्राणमयः कोशः कर्मेंद्रियैः सहितं मनः
मनोमयकोशः ज्ञानेंद्रियैः सहिता बुद्धिर्विज्ञानमयः कोशः अयमेव कर्तृत्वोपाधिः विज्ञानं यज्ञं तनुत इत्यादिश्रुतेः अंतःकरण
स्य सत्ववृत्तिर्द्विविधा॰ निश्चयवृत्तिः सुखाकारवृत्तिश्चेति॰ निश्चयवृत्तिमदंतःकरणं बुद्धिरुच्यते॰ सुखाकारवृत्तिमदंतः
करणं भोक्तृत्वोपाधिः तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्ष इत्यादिश्रुतेः अयमेव कारणपर्यंतमानंदम

रिस

तत्वा· यः कोशः केचित्त्वज्ञानमानंदमयकोशं वदंति· इदं सूक्ष्मशरीरं सप्तदशलिंगं द्विविधं· समष्टिव्यष्टिभेदादपंचीकृतपंचमहाभू
३ ततत्कार्यसप्तदशलिंगं समष्टिरित्युच्यते· तदुपहितं चैतन्यं हि हिरण्यगर्भ इत्युच्यते· प्राणसूत्रात्मेति च ज्ञानक्रियाशक्तिमदुपहितत्वा=
द्व्यापित्वाच्च· अथवा पूर्वोक्तापंचीकृतभूतेभ्यः सर्वव्यापिकं लिंगशरीरं पृथगेवोत्पन्नं· तदेव समष्टिरित्युच्यते· समष्टित्वं नाम गोत्वादि
वत्सर्वव्यष्टिषु अनुस्यूतत्वं· तदुक्तं· तेभ्यः समभवत्सूत्रं लिंगं सर्वात्मकं महदिति· केचित्तु वनलिंगसमुदायसमष्टिरिति वदंति· प्रत्येक=
लिंगशरीरं व्यष्टिरित्युच्यते· व्यष्टित्वं नाम व्यक्तिवद्व्यावृत्तत्वं· तदुपहितं चैतन्यं तैजस इत्युच्यते· तेजोमयांतःकरणोपाधित्वात्· सामान्यविशे
षयोरिव जातिव्यक्त्योरिव च· समष्टिव्यष्ट्योस्तादात्म्याभ्युपगमात्तदुपहितयोस्तैजससूत्रात्मनोरपि तादात्म्यं· तदेव सूक्ष्मशरीरमविद्या
कामकर्मसहितं पर्यष्टकमित्युच्यते· ज्ञानेंद्रियपंचकं कर्मेंद्रियपंचकं अंतःकरणचतुष्टयं प्राणपंचकं भूतसूक्ष्मपंचकं अविद्याकामकर्मस
हितं पर्यष्टकमित्युच्यते· चेतान्यष्टौ· तत्र कार्याविद्या द्रष्टव्या साच चतुर्विधा· अनित्ये नित्यत्वबुद्धिः अशुचौ शुचित्वबुद्धिः असुखे सुखत्वबु
द्धिः अनात्मन्यात्मत्वबुद्धिः तदुक्तं· अनित्याशुचिदुःखानात्मसु शुचिसुखात्मख्यातिरविद्येति· अस्यार्थः अनित्ये ब्रह्मलोकादिफले ३

नित्यत्वबुद्धिरेकाविद्या द्रष्टव्या· अशुचिषु स्वशरीरपुत्रभार्यादिशरीरेषु शुचित्वबुद्धिरपरा· सुखदुःखसाधनेषु सुखत्वं तस्मान्नबुद्धिरन्या· अ
नात्मनि देहेंद्रियादिष्वहमित्यात्मबुद्धिरपरा चेत्यविद्या चतुर्विधेति· ४ कामोभोगः कर्म त्रिविधं· संचितमागामि प्रारब्धं चेति· स्वकृतं फलम
दत्वा अदृष्टरूपेण विद्यमानं संचितं कर्म १ यथा संध्यावंदनाग्निहोत्राद्यागाम्यस्मिन् शरीरे क्रियमाणं कर्म २ वर्तमानशरीरारंभकं प्रारब्धं कर्म ३
संचितागामिककर्मणोः फलभोगेन वा विरोधिकर्मांतरेण वा ब्रह्मज्ञानेन वा विनाशः प्रारब्धस्य तु भोगेनैव नाशः किं बहुना प्रारब्धव्यतिरिक्ता
नामविद्यादीनां पंचक्लेशानां तत्त्वज्ञानान्नाशः तथा ह्यविद्यास्मितारागद्वेषाभिनिवेशाः पंचक्लेशाः कार्यकारणरूपा द्विविधा निरूपिता॰ अ
हंकारस्य सूक्ष्मावस्थास्मिता· इदमेव महत्तत्वं सामान्याहंकार इति च प्रोच्यते· राग उक्तः द्वेषः क्रोधः स्वकृतस्य पुण्यस्य त्यागासहिष्णुत्वमभिनि
वेशः एतेषां पंचानां ब्रह्मसाक्षात्कारान्निवृत्तिः ज्ञात्वा देवं मुच्यते सर्वपाशैरित्यादिश्रुतेः पाशैः पंचक्लेशैरित्यर्थः तिष्ठतु तावत्प्रासंगिकं·
एवं सूक्ष्मशरीरोत्पत्तिर्निरूपिता· पंचीकृतभूतानि स्थूलभूतानि· पंचीकरणं तु पूर्वोक्तानामाकाशादीनां तामसांशादेकैकं द्विधा विभज्य त
त्रैकं चतुर्धा विभज्य स्वांशं परित्यज्येतरांशेषु संयोजनं· तासां त्रिवृतमेकैकं करवाणीति त्रिवृत्करणश्रुतेः पंचीकरणस्याप्युपलक्षणत्वा

तत्वानु॰ पंचीकरणंप्रामाणिकमेव॰ वैशेषादाक्यात्तद्वादः तत्कथनं॰ यथाहि॰ पृथिव्यांजला दितुर्यांशमेलन खंड चतुष्टयसहिताःपृथिवी सैवोपदिश्यते॰
४॥ एवमन्यत्र॰ वैशेष्यात्तद्वादइतिन्यायेनस्वांशभूयस्त्वाद्विशेषव्यपदेशोपिसंभवति॰ एवं च सत्याकाशे शब्दोभिव्यज्यते॰ वायौ शब्दस्पर्शौ॰ तेजसि
शब्दस्पर्शरूपाणि॰ जलेशब्दस्पर्शरूपरसाः पृथिव्यां शब्दस्पर्शरूपरसगंधाः तथापंचीकृतपृथिव्याः ब्रह्मांडमुत्पन्नं तदंतर्वर्तीलोकाश्चतुर्दश
ब्रह्मांडांतर्वर्तीपृथिव्याउत्पन्नओषधीभ्योन्नं पितृभ्यांभुक्तान्नपरि[illegible]मरेतः शोणितद्वारास्थूलशरीरंउत्पन्नं॰ तच्चतुर्विधं॰ जरायु
जमंडजं स्वेदजमुद्भिदं चेति॰ मनुष्यादिशरीरंजरायुजं॰ पक्षिपन्नगादिशरीरमंडजं यूकादिशरीरं स्वेदजं॰ तृणगुल्मादिशरीरमुद्भिज्जं उक्तंस्थू
लशरीरं॰ पुनः प्रकारांतरेणाद्विविधसमष्टिव्यष्टिभेदात्॰ पंचीकृतपंचमहाभूततत्कार्यब्रह्मांडंतदंतर्वर्तीकार्यंसर्वंसमष्टिरित्युच्यते॰ अथका
व्य[illegible]त्तिषुगोत्वादिवत्सर्वव्यष्टिष्वनुस्यूतंपंचीकृतभूतकार्यंब्रह्मांडात्मव्यापकंसमष्टिः वनवत्सकलस्थूलशरीरसमुदायोवासमष्टि
रित्युच्यते॰ एतदुपहितंचैतन्यंविराड्वैश्वानरइतिचोच्यते॰ विविधंराजमानत्वात्सर्वनराभिमानित्वाच्च॰ प्रत्येकंस्थूलशरीरंगवादिव्य
क्तिवद्वावृक्षव्यष्टिरित्युच्यते॰ एतदुपहितंचैतन्यंविश्वइत्युच्यते॰ सूक्ष्मशरीरमपरित्यज्यस्थूलशरीरेप्रविष्टत्वात्॰ अनयोः समष्टिव्यष्ट्योः ४

सामान्यविशेषयोरिवतादात्म्याभ्युपगमादेतदुपहितयोर्विश्ववैश्वानरयोरपितादात्म्यं॰ एकएवहिजीवोजाग्रदवस्थायां स्थूलसूक्ष्मकारणाविद्याभिमानीसन्विश्वइत्यु
च्यते॰ सएवस्वप्नावस्थायां सूक्ष्मशरीरकारणाविद्याभिमानीसन्॰ तैजसइत्युच्यते॰ सएवसुषुप्तौकारणाविद्याभिमानीसन्प्राज्ञइत्युच्यते॰ सर्वेष्वपिलिंगशरीरस्याभि
भिमानरहितः सन्रुद्धपरमात्माभवति॰ तस्यैवाभिमानिनोजीवस्यावस्थाःपंच॰ जाग्रत्स्वप्नसुषुप्तिमूर्छामरणभेदात्॰ दिग्वाद्यादित्यादिदेवतानुग्रहितैरिंद्रियैः
शब्दादिविषयानुभवावस्थाजाग्रदवस्था॰ जाग्रद्भोगप्रदकर्मोपरमे संतिइंद्रियोपरमेजाग्रदनुभवजन्यसंस्कारोद्भूतविषयतज्ज्ञानावस्थास्वप्नावस्था॰ जाग्रत्स्वप्नो
भयभोगप्रदकर्मोपरमेण स्थूलसूक्ष्मशरीराभिमाननिवृत्तिद्वाराविशेषविज्ञानोपरमात्मिकाबुधेः कारणात्मनावस्थितिः सुषुप्तिः मुद्गरप्रहणादिजनितविषा
देनविशेषविज्ञानोपरमावस्थामूर्छावस्था॰ तदुक्तं॰ मुग्धेर्धःसंपत्तिपरिशेषादिति॰ एतच्छरीरभोगप्रापककर्मोपरमेणद्विविधदेवहाभिमाननिवृत्त्यासंपीडितक
रणग्रामावस्थाभाविशरीरप्राप्तिपर्यंतंमरणावस्था॰ केचित्वस्याः उत्क्रावस्थास्वतंत्रैवदंति॰ अत्रश्रुतिस्मृतिप्रमाणानिप्रसिद्धानि॰ एकएवपरमात्मास
मष्टिस्थूलसूक्ष्मशरीरतत्कारणमायोपहितः सन्वैश्वानरइत्युच्यते॰ अहमेववैश्वानरोस्मीत्येतदुपासनयातत्प्राप्तिफलंभवति॰ वैश्वानराधिकरणे सूत्र
कारभाष्यकाराभ्यांश्रुत्यर्थस्यतथाप्रतिपादनात्॰ सएवपरमात्मासमष्टिसूक्ष्मशरीरतत्कारणमायोपहितःसन्हिरण्यगर्भइत्युच्यते॰ एतदुपासनयातत्प्रा
प्तिःफलंभवति॰ अंतरोपपत्तेरित्यस्मिन्नधिकरणे सूत्रकारभाष्यकाराभ्यांउपकोशलविद्यायांतथैवप्रतिपादनात्॰ सएवकेवलमायोपाधिकः संान्नी

तत्वानु· श्वर इत्युच्यते॰ तदुपासनया तत्प्राप्तिः फलं भवति· सर्वत्र प्रसिद्ध्योपदेशादिति शांडिल्यविद्यायां हरेतूरेभ्य इति दहरविद्यायां च सूत्रकारभाष्यकाराभ्यां
यथेश्वरोपासया तत्प्राप्तिफलप्रतिपादनात् यथा यथोपासते तत्तथैव भवतीति श्रुतेश्च भवनामाद्येतु तत्तारतम्येन सार्ष्टिसारूप्यसामीप्यसालोक्य
५ फलं निष्पद्यंते· साम्नः सायुज्यं सलोकतां जयतीत्यादिश्रुतेः येपुनः साधनचतुष्टयसंपन्ना विचारासमर्था मंदप्रज्ञास्तेषां गुरुमुखाद्ब्रह्मनि
श्चित्य सर्वोपाधिविनिर्मुक्तं सच्चिदानंदलक्षणं ब्रह्माहमस्मीति निर्गुणोपासनया स्मिन्नेव शरीरे जीवनावस्थायां वा ब्रह्मलोके वा उत्पन्नब्रह्मसाक्षा
त्कारेण तत्प्राप्तिः फलं भवति श्रुतिन्यायसाम्यात्· ॐमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीत स एतस्माज्जीवघनात्परात्परं पुरुषमीक्षते ॐमित्या
त्मानं युंजीत॰ ॐमित्येव ध्यायेत्· याथात्मानमित्यादिश्रुतिभ्यः भगवताप्युक्तं· ॐ मित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्· यः प्रयाति त्यजन्देहं
स याति परमां गतिमिति· अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते· तेपि चातितरंत्येव मृत्युं श्रुतिपरायणा इति· एवं तत्पदार्थस्य मायोपहितस्य ब्रह्मणः तट हरिः
स्थलक्षणं जगज्जन्मादिकारणत्वं निरूपितं· अयमेवाध्यारोप इत्युच्यते· अस्यापवाद इदानीमुच्यते· अपवादो नाम मायांशप्रतीतस्य तद्व्यतिरेकेणा ५
भावनिश्चयः यथा शुक्त्यादौ प्रत्याप्रतीतस्य रजतादेः शुक्तिव्यतिरेकेण नेदं रजतं किंतु शुक्तिरित्यभावनिश्चयः अयमेव बाधो विलापन

निति चोच्यते· स च बाधस्त्रिविधः शास्त्रीको यौक्तिकः प्रत्यक्षश्चेति· अथात आदेशो नेति नेतीति नेह नानास्ति किंचनेति शास्त्राद्ब्रह्मव्यतिरे
केण प्रपंचाभावनिश्चयः शास्त्रीयबाधः मृद्व्यतिरेके न घटाभावनिश्चयवन्निखिलकारणीभूतब्रह्मव्यतिरेकेण निखिलप्रपंचाभावनि
श्चित्य दृश्यमानस्य मिथ्यात्वनिश्चयेन ब्रह्मात्मनात्र निश्चयो यौक्तिकबाधः अहं ब्रह्माहमस्मि तत्त्वमस्यादिवाक्यजन्यसाक्षात्कारेण
ज्ञानेन तत्कार्यनिवृत्तिः प्रत्यक्षबाधः यौक्तिकबाधस्यायं क्रमः स्थूलप्रपंचं सर्वमपि स्थूलभूतेषु विलाप्य तद्व्यतिरेकेण तन्नास्तीति निश्चित्य स्थू
लभूतानि समष्टिव्यष्टिसूक्ष्मशरीरं सूक्ष्मभूतेषु विलाप्य तत्रापि पृथिवीमप्सु विलाप्यापस्तेजसि तेजो वायौ वायुमाकाशे आकाशमज्ञाने
अज्ञानं चिन्मात्रे विलापयेत्· तथा च स्मृतिः जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते· ज्योतिष्यापः प्रलीयंते ज्योतिर्वायौ प्रलीयते· वायुश्च ली
यते व्योम्नि तच्चाव्यक्ते प्रलीयते· अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयत इति· उक्तं च अकारं पुरुषं विश्वमुकारे प्रविलापयेत्· उकारं तैजसं सूक्ष्मं
मकारे प्रविलापयेत्· मकारं कारणं प्राज्ञं चिदात्मनि विलापयेदिति· अध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवति·
तथाहि मायादिसमष्टिस्तदुपहितं चैतन्यं पदलक्ष्यार्थो भवति· अविद्यादिव्यष्टिस्तदुपहितं चैतन्यमेतदाधारानुपहितं प्रत्यक्चैतन्यमेतच्च

तत्वानु·

·८

यंतत्वायः पिंडवदविविक्तमेकत्वेनाभासमानं त्वंपदवाच्यार्थो भवति· विविक्तं प्रत्यक्चैतन्यं त्वंपदलक्ष्यार्थो भवति· एतौ लक्ष्यार्थावुपादाय संबंध
त्रयेण सहितं तत्वमस्यादिवाक्यं लक्षणयाखंडार्थबोधकं भवति· संबंधत्रयं तु· पदयोः सामानाधिकरण्यं सामानाधिकरण्यं नाम भिन्नप्रवृ
त्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः यथा सोयमयं देवदत्त इत्यत्र तत्कालविशिष्टदेवदत्तवाचकसशब्दस्य एतत्कालविशिष्टदेवदत्तवाच
कायंशब्दस्य चैकस्मिन्देवदत्तपिंडे वृत्तिः सामानाधिकरण्यं· पदार्थयोर्विशेषणविशेष्यभावः यथा तत्रैव· सशब्दार्थतत्कालविशिष्टायंशब्दा
र्थैतत्कालविशिष्टयोरन्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः सोयमयं स इति पदयोरर्थयोर्वा विरुद्धवाक्यार्थेन सह लक्ष्यलक्षणभा
यथा तत्रैव सोयमित्यादिवाक्ये सशब्दायोस्तदर्थयोर्वा विरुद्धदेवदत्तपिंडेन वाक्यार्थेन सह लक्ष्यलक्षणभावः तथा तत्वमस्यादिवाक्ये तत्वंपदयोः·
परोक्षत्वापरोक्षत्वविशिष्टेश्वरजीवावचकयोरखंडचैतन्येनार्थे वृत्तिः सामानाधिकरण्यं तथा तत्वंपदार्थयोरीश्वरजीवयोरन्योन्यभेदव्यावर्त
कतया तत्वमसि त्वं तदसीति विशेषणविशेष्यभावः तथा तत्वंपदयोस्तदर्थयोर्वा वाक्यार्थेनाविरुद्धाखंडचैतन्येन विरुद्धांशपरित्यागेन ल
क्ष्यलक्षणभावः तदुक्तं सामानाधिकरण्यं च विशेषणविशेष्यता· लक्ष्यलक्षणसंबंधः पदार्थः प्रत्यगात्मनोरिति· अस्यार्थस्तूक्त एव·
एतदाभिप्रायेण वाक्यवृत्तावप्युक्तं· तत्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने लक्ष्यौ तत्वंपदार्थौ द्वावुपादाय प्रत्यक्षादिविरुद्धत्वेन तत्वमस्यादिवाक्ये

प्रतिपाद्यत्वायोगात् वर्तते इति तादात्म्यप्रतिपादने खंडस्वरूपप्रतिपादन इत्यर्थः संसर्गस्य वा विशिष्टस्य वा विशिष्टैकस्य वा प्रत्यक्षादिविरुद्धत्वेन त
त्वमस्यादिवाक्ये प्रतिपाद्यत्वायोगात्· अखंडत्वं नाम विजातीयसजातीयभेदशून्यता· एकरसत्वात् स्वगतभेदशून्यता· अथवा त्रिविधपरि
च्छेदशून्यत्वमखंडत्वं विभुत्वाद्देशपरिच्छेदशून्यत्वं नित्यत्वात्कालपरिच्छेदशून्यत्वं सर्वात्मत्वाद्वस्तुपरिच्छेदशून्यत्वं वेदाहमेतमजरं पुराणं स
र्वात्मनं सर्वगमतं विभुत्वादित्यादिश्रुतेः यद्वा अपर्यायानेकशब्दप्रकाश्यत्वे सति अविशिष्टस्यत्वमखंडत्वं· तदुक्तं· अविशिष्टमपर्या
यानेकशब्दप्रकाशितं· एकं वेदांतनिष्णाता अखंडं प्रतिपेदिरे· एवं तत्वमस्यादिवाक्यजन्याखंडापरोक्षज्ञानादज्ञाननिवृत्तिरानंदावाप्तिश्च· त
दुक्तं· प्रत्यग्बोधो य आभाति सोद्वयानंदलक्षणः अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत्· अब्रह्म
त्वं त्वमर्थस्य व्यावर्तेत तदैव हि। तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु। पूर्णानंदैकरूपेण प्रत्यग्बोधोवतिष्ठत इति· अन्योन्यतादात्म्यप्राप्ति
अहं ब्रह्मास्मि ब्रह्मैवाहमस्मि इत्यखंडाकारवृत्तिः यथा स्वाज्ञानेन निवृत्ते ब्रह्मत्वपरोक्षादिनाशे तत्वात् प्रत्यगात्मनोखंडानंदस्वरूपावस्थितिर्भ
वतीति श्लोकतात्पर्यार्थः वृत्तिर्नाम विषयचैतन्याभिव्यंजकोंतःकरणाज्ञानयोः परिणामविशेषः अभिव्यंजकत्वं नामापरोक्षव्यवहारजनक
त्वमावरणनिवर्तकत्वं वा· परिणामोपादानसमसत्ताकान्यथाभावः उपादानविषमसत्ताकान्यथाभावो विवर्त इति नास्त्यांतविरोधः तस्म

तत्वानु नोकुरुतेत्यादिश्रुत्यंतःकरणकार्यद्रव्यत्वेनसावयवत्वात्परिणामित्वोपपत्तिः। साचवृत्तिर्द्विविधा। प्रमाप्रमाभेदात्। तत्रबोध्येआवृत्तित्वबोधो
९ मोवप्रमा। साचद्विविधा। ईश्वराश्रयाजीवाश्रयाचेति। तत्रेक्षणापरपर्यायसृष्ट्यव्यविषयाकारप्रमाप्रतिबिंबितचिदीश्वराश्रया। तदैक्षतबहु
स्यांप्रजायेयेत्यादिश्रुतेः अनधिगताबाधितविषयाकारांतःकरणवृत्तिप्रतिबिंबितचिद्द्वितीया। अत्रालौकिकप्रमायाः तथात्वम[illegible]
प्रपंचस्यसंसारदशायामबाधितत्वात्प्रमायांनाव्याप्तिः शुक्तिरजतदेर्तीतवसत्ताकत्वेनज्ञातसत्ताकत्वाभावान्नातिव्याप्तिः तत्करणंप्रमा
णं। साजीवाश्रयाप्रमाद्विविधा। पारमार्थिकीव्यावहारिकीचेति। तत्रतत्त्वमस्यादिवाक्यजन्याप्रमापारमार्थिकीसाच निरूपितापुरे
निरूपयिते। प्रपंचप्रमाव्यावहारिकी। साचषड्विधा। प्रत्यक्षानुमित्युपमितिशाब्दार्थापत्त्यभावप्रमाभेदात्। तत्रविषयचैतन्याभिन्नप्रमा
णचैतन्यप्रत्यक्षप्रमा तथाह्येकमेवचैतन्यमुपाधिभेदाच्चतुर्विधं। प्रमातृचैतन्यंप्रमाणचैतन्यंविषयचैतन्यंफलचैतन्यंचेति। तत्रांतः 6
करणविशिष्टचैतन्यंप्रमातृचैतन्यं। अंतःकरणवृत्त्यवच्छिन्नचैतन्यंप्रमाणचैतन्यं। घटाद्यवच्छिन्नचैतन्यंविषयचै
तन्यं। अंतःवृत्त्यभिव्यक्तचैतन्यंफलचैतन्यं। तत्रवृत्तिविषययोर्युगपदेकदेशावस्थाने

तदुपहितचैतन्ययोरप्यभेदोभवति। तथाहि। तडागोदकंछिद्रान्निर्गत्यकुल्याद्वाराकेदारंप्रविश्यचतुःकोणप्रथापरिणमतेतथेंद्रियार्थ
सन्निकर्षानंतरमंतःकरणंचक्षुरादिद्वाराविषयदेशंगत्वातेतसंज्यप्रयुपश्चात्तदाकारेणपरिणमते। सोयंपरिणामोवृत्तिः तस्यांवृत्तौविषयचैत
न्यंप्रतिफलति तदावृत्तिविषययोर्युगपदेकदेशस्थत्वेनतदुपहितभेदाभावेनैकत्वात् प्रमाणचैतन्यंविषयचैतन्याभिन्नंभवसेतियंप्रत्यक्षप्र
मातत्रवृत्त्यावरणंनिवर्ततेचैतन्येनाज्ञानंभ्रमयाबासावरणमज्ञानंनिवर्ततेततोविषयःस्फुरतिसाक्षिणं अंतःकरणोपहितचैतन्यंसाक्षीसेयं
प्रत्यक्षप्रमाद्विविधा। बाह्यांतरप्रमाचेति। तत्रबाह्यप्रमा। शब्दस्पर्शरूपरसगंधभेदात्पंचविधा। तत्करणानिश्रोत्रादीनिज्ञानेंद्रियाणिपंच
आंतरप्रमाद्विविधा। आत्मगोचरासुखादिगोचराचेति। आत्मगोचराद्विविधा। विशिष्टात्मविषयाशुद्धात्मविषयाचेति। अहंजीवइत्यादि
विशिष्टात्मविषया। अहंब्रह्मास्मीतिशुद्धात्मविषया। मयिसुखमित्यादिसुखादिविषयाआंतरेंद्रियंमनः आंतरप्रमाकरणमितिवाचस्प
तिमिश्राःआचार्यास्त्वेवंवर्णयंति। इंद्रियेभ्यःपराह्यर्थाह्यर्थेभ्यश्चपरंमनः। इंद्रियेभ्यःपरंमनइतिश्रुतिस्मृतिभ्यांमनसइंद्रियेभ्यःपृथक्कर
णात्मनो।नेंद्रियंवृत्तिप्रत्युपादानकारणत्वाच्चांतःकरणमतः सुखादिसाक्षात्कारस्यप्रमाणाजन्यत्वेनाप्रमाणत्वमिष्टमेव। अतएवांतःकरण
तद्धर्माणांशुक्तिरजतादिवत्प्रतीतिजनकत्वं। शुद्धात्मसाक्षात्कारस्यवेदांतवाक्यजन्यत्वात्प्रमात्वं। वाक्यस्याप्यपरोक्षज्ञानजनकत्वंवक्ष्यते।
लिंगज्ञानजन्यंज्ञानमनुमितिः व्याप्त्याश्रयोलिंग। साधनसाध्ययोर्नियतमासामानाधिकरण्यंव्याप्तिः प्रतिबंधकाभावेसतिसहचारदर्शनेन
सागृह्यते। यस्यांगृहीतायांलिंगज्ञानेनव्याप्त्यनुभवजन्यसंस्कारोद्बोधेसत्यनुमितिर्जायतेइयंस्वार्थानुमितिः परार्थानुमितिस्तु न्या

वे०प० यसाध्या· न्यायोवयवसमुदायः अवयवाश्चत्रयः प्रतिज्ञाहेतूदाहरणरूपाः उदाहरणोपनयनिगमनरूपाभ्रावाः तथाहि· जीवः परस्मान्नभि
द्यते·सच्चिदानंदलक्षणत्वात्·परमात्मवदित्यत्रजीवः परस्मान्नभिद्यतइतिप्रतिज्ञा·सच्चिदानंदलक्षणत्वंहेतुः० इदमेलिंगइत्युच्यते·यसच्चिदा
८ नंदलक्षणःसपरस्मान्नभिद्यतेयथापरमात्मेत्युदाहरणं· अहममस्मिभ्रयामिकदाप्यप्रियोनभवामीत्यनुभवाज्जीवस्यसच्चिदानंदलक्ष
णत्वंअतोनहेत्वसिद्धिः सत्यंज्ञानमनंतंब्रह्मानंदोब्रह्मेतिव्यजानादित्यादिश्रुत्याब्रह्मणः सच्चिदानंदलक्षणत्वं अतोनदृष्टांतासिद्धिः
एवंगुरुमुखाद्वेदांतस्यशोधितस्यत्वंपदार्थस्यस्वस्मिन्नेवससच्चिदानंदलक्षणदर्शनात् अहंब्रह्मेतिब्रह्माभिन्नानुमितिरुत्पद्यते·नचोप
निषद्स्यब्रह्मलक्ष्यस्यानुमानगम्यत्वानुपपत्तिः मंतव्यमितिमननविधानाद्वेदांतसहकारित्वेनानुमानप्रमाण्यस्वीकारात्परार्था
नुमितिस्तुन्यायोपदेशेनोत्पद्यते· न्यायोदर्शितः एवंब्रह्मव्यतिरिक्तस्यप्रपंचस्यमिथ्यात्वसाध्यानुमितिः दृश्यत्वादिहेतुभिरुत्पद्यते·मिथ्यात्वंना
मानिर्वचनीयत्वंदृश्यत्वंनामचैतन्यविषयत्वं अतोनब्रह्मणिव्यभिचारः तच्चानुमानमन्वयरूपमेकमेवनतुकेवलान्वयी· अस्मिन्मतेब्रह्म
व्यतिरिक्तस्यसर्वस्यात्यंताभावप्रतियोगित्वेनतत्प्रतियोगित्वरूपकेवलान्वयित्वस्यासिद्धिः· नापिव्यतिरेकी·साधनेतुसाध्यानुमि ८
तौसाध्याभावसाधनाभावव्याप्तिज्ञानस्यानुपयोगात्·अन्वयव्याप्तिमिवदुःसाध्यप्रमार्थापत्तिप्रमाणादितिवक्ष्यते· सादृश्यप्रमिति
रूपमितिः· वाक्यकरणिकाप्रमाशाब्दी· आकांक्षायोग्यतासंनिधिमत्पदसमुदायोवाक्यम् अन्वयानुपपत्तिःकांक्षा·वाक्यार्थबाधोयोग्य

ताअविलंबोच्चारणंसंनिधिः अव्युत्पन्नस्यसंगतिग्रहाभावान्नवाक्यार्थप्रमा· पदपदार्थयोः स्मार्यस्मारकभावःसंगतिः साद्विविधा शक्तिर्लक्षणाचेति· शक्तिर्नामपदस्यार्थेवृत्तिः प
दपदार्थयोर्वाच्यवाचकभावसंबंधइतियावत्· साचद्विविधा· योगोरूढिश्चेति· अवयवशक्तिर्योगः यथापाचकादिपदानां· रूढिः समुदायशक्तिः यथाघटादिपदानां· साच
व्यवहारादिनागृह्यते· तथाहि उत्तमवृद्धस्यघमानयेतिवाक्यश्रवणानंतरंमध्यमवृद्धः प्रवर्तते· बालःप्रवृत्तिंदृष्ट्वाज्ञानमनुमिनोति· तथाहीयंप्रवृत्तिर्ज्ञानसाध्याप्रवृत्तित्वान्मदी
यप्रवृत्तिवदितिज्ञानमनुमायतस्यवाक्यजन्यत्वमनुमिनोति· इदंज्ञानमेतद्वाक्यजन्यमेतद्वाक्यान्वयव्यतिरेकानुविधायित्वात्दंडजन्यघटादिवदित्यनंतरंसामान्यविशेषाभ्यां
आवापोद्वापाभ्यांघटपदस्यघटव्यक्तौशक्तिमवधारयति· साचशक्तिःपदार्थेइतिनैयायिकाः कार्यान्वितेइतिमीमांसकाः अन्वितेइतिवेदांतिनः एवंव्याकरणा
दिनापिशक्तिर्गृह्यते· उक्तंच· शक्तिग्रहंव्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च· वाक्यस्यशेषाद्विवृतेर्वदंतिसान्निध्यतः एवंव्याकरणादिनासिद्धपदस्य
वृद्धाइति· लक्षणाशक्यसंबंधः साचद्विविधा· केवललक्षणालक्षितलक्षणाचेति· केवलात्रिविधा· जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणाचेति· शक्या
र्थपरित्यागेनतत्संबंध्यर्थांतरेवृत्तिः तथामंचाःक्रोशंतीत्यत्रमंचस्थपुरुषे शक्यैकदेशापरित्यागेनाजहल्लक्षणा· जहदजहल्लक्षणाभागलक्षणेत्युच्यते· यथा
सोयंदेवदत्तइत्यत्रसोयमितिपदयोःकेवलंदेवदत्तदेहपिंडे· यथावातमसीत्यत्रतत्त्वंपदयोरखंडचैतन्ये· शक्यपरंपरासंबंधोलक्षितलक्षणा· यथाद्विरेफप
दस्यमधुकरे· गौणीलक्षितलक्षणैव· एवंव्युत्पन्नस्यगृहीतसंगतिकवाक्याद्वाक्यार्थप्रमोत्पत्तौ· आकांक्षायोग्यतासन्निधितात्पर्यज्ञानंचेतिचत्वारिकारणा
नि· आकांक्षायोग्यतेनिरूपिते· शक्तिलक्षणान्यतरसंबंधेनाव्यवधानेनपदजन्यपदार्थोपस्थितिःसन्निधिः तात्पर्यंद्विविधं· वक्तृतात्पर्यंशाब्दतात्पर्यंचेति· पुरुषाभि

तात्वानु प्रायो न त्कृ तात्पर्ये तज्ज्ञानं वा क्यार्थज्ञानेन कारणं · तभेदावे व्युत्पन्नवाक्याद्वाक्यार्थज्ञान दर्शनान्न तदितरप्रतीतिमात्रे छयानुचरितत्वसतीः तदर्थप्र
तीतिजननयोग्यत्वं शब्दतात्पर्यं तच्च षड्विधैर्लिंगैर्निश्चीयते · वदे लिंगानि तु दर्शितानि · उपक्रमोपसंहारावभ्यासोऽपूर्वता फलं। अर्थवादोपपत्तिश्च लिंगं तात्पर्य
१ निर्णय इति · अस्यार्थः प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः आद्यंतयोः प्रतिपादनं उपक्रमोपसंहारौ · यथा छांदोग्यषष्ठे सदेव सौम्येदमग्र आसीदेकमेवाद्विती
यमेतदात्म्यमिदं सर्वमित्युपक्रमोपसंहाराबाद्यंतयोः प्रकरणस्य पाद्यस्य पुनः पुनः प्रतिपादनमभ्यासः यथा तत्रैव तत्त्वमसीति नव कृत्वाभ्यासः प्रकरणप्रतिपाद्यस्य मानांतरा
विषयता पूर्वता · यथा तत्रैवाद्वितीयवस्तुनो मानांतराविषयता · प्रकरणप्रतिपाद्यस्य श्रूयमाणं तज्ज्ञानात्प्रयोजनं फलं यथा तत्रैवाचार्यवान्पुरुषो वेद तस्य
तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इत्यद्वितीयवस्तुज्ञानात्तत्प्राप्तिः फलं · प्रकरणप्रतिपाद्यस्य प्रशंसनमर्थवादः यथा तत्रैव येनाश्रुतं श्रुतं
भवत्यमतं मतमविज्ञातं विज्ञातं इत्यद्वितीयवस्तुप्रशंसनं · प्रकरणप्रतिपाद्यस्य दृष्टांतैः प्रतिपादनमुपपत्तिः यथा तत्रैव · यथा सौम्यैकेन मृत्पि
डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिवाक्यप्रतिपादितमदादिषु दृष्टांतैरद्वितीयवस्तुप्रतिपादनं · एवं
षड्विधैस्तात्पर्यलिंगैर्दर्शितानामद्वितीयब्रह्मणि तात्पर्यनिश्चयः इदमेव श्रवणमित्युच्यते · श्रुतस्यार्थस्योपपत्तिभिश्चिंतनं विजातीयप्रत्ययतिरस्कारेण सजा
तीयप्रत्ययप्रवाहीकरणं निदिध्यानं · तदुक्तं · शब्दशक्तिविषयं निरूपणं युक्तितो श्रवणमुच्यते बुधैः वस्तुतत्त्वविषयं निरूपणं युक्तितो मननमित्युदीर्यते · चेतसस्तु चितिमात्रशे ७१७

षताध्यानमित्यभिवदंति वैदिकाः · अंतरंगमिदमित्थमीरितं तत्तु रूप्यपरमात्मबुद्धये · इतीदं श्रवणादित्रयं साधानसंपन्नस्य संन्यासि
नः ज्ञानं प्रत्यंतरंगसाधनं · आत्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यादिश्रुतेः साधनानि तु · नित्यानित्यवस्तुविवेकः इहामुत्रार्थभो
गविरागः शमदमादिसंपन्नमुमुक्षुत्वं चेत्येवं रूपाणि · परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायन्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गु
रुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं कश्चिद्धीरः प्रत्यगात्मानमैक्षता · वृत्तचक्षुरमृतत्वमिच्छन् शांतो दांत उपरतस्तितिक्षुः स
माहितो भूत्वात्मन्येवात्मानं पश्येदित्यादिश्रुतिभ्यः यथोक्तसाधनसंपन्नस्य संन्यासाधिकारः विहितानां कर्मणां विधिनापरित्यागः
संन्यासः स च वैराग्यहेतुकः · यदहरेव विरजेत्तदहरेव प्रव्रजेदित्यादिश्रुतेः वैराग्यपरमेतस्य परमोवधिरति स्मृतेश्च · स वैराग्यतारतम्ये
न चतुर्विधः कुटीचबहूदकहंसपरमहंसभेदात् · वैराग्यं द्विविधं · अपरं परं चेति · तत्रापरं चतुर्विधं · यतमानव्यतिरेकैकेंद्रियवशी
कारभेदात् · अस्मिन्संसारे इदमसारमिति सारासारविवेको यतमानवैराग्यं · चित्तगतदोषेषु मध्ये एतावंतः पक्वा एतावंतोऽपक्वा इ
ति विविच्यापक्वदोषनिरोधयत्नो व्यतिरेकवैराग्यं · विषयेच्छास्त्वेपिमनसांद्रियविरोधावस्थानमेकेंद्रियत्ववैराग्यं · वशीकारवैराग्यं
ऐहिकामुष्मिकविषयजिहासा · तदुक्तं · दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति · तत्त्रिविधं · मंदं तीव्रं तीव्रतरं चेति
पुत्रदारादिवियोगे धिक् संसारमिति बुध्या विषयजिहासा मंदवैराग्यं · अस्मिन्जन्मनि पुत्रदारादि मा भूदिति स्थिरबुध्या विषयजिहासा ती
व्रं पुनरावृत्तिसहितं ब्रह्मलोकादिपर्यंतं मास्त्विति स्थिरबुध्या विषयजिहासा · तीव्रतरं · तत्र मंदवैराग्ये संन्यासाधिकार एव नास्ति · यद

तत्त्वानु·

मनसिवैराग्यंजायते सर्ववस्तुषु॰ तदैव सन्यसेद्विद्वानन्यथापतितो भवेदिति स्मरणात् · तीव्रवैराग्यसत्तायात्राद्यशक्तौकुटीचकाधिकारः तच्छ
क्तौबहूदकसन्यासाधिकारः तीव्रवैराग्येसतिहंससन्यासाधिकारः एतेत्रयः सन्यासाः एतेषामाचाराः स्मृतौ प्रसिद्धाः तीव्रतरवैराग्येसति
मुमुक्षोः परमहंससन्यासाधिकारः सचपरमहंसोद्विविधः विविदिषासन्यासो विद्वत्सन्यासश्चेति · साधनसंपन्नेन तत्त्वज्ञानमुद्दिश्य क्रिय
माणः सन्यासः विविदिषासन्यासः एकमेवप्रव्राजिनोलोकमिच्छंतः प्रव्रजंतीतिश्रुतेः तत्रप्रमाणं · सचद्विविधः जन्मपादककर्मत्यागात्मकः
प्रैषोच्चारणपूर्वकदंडधारणाद्याश्रमरूपश्चेति · नकर्मणानप्रजयाधनेनत्यागेनैकेनामृतत्वमानशुः इत्यादिश्रुतिराद्येप्रमाणं · विरक्तस्यगृ
हस्थादेः प्रबलमितवशेनसन्यासप्रतिबंधे आद्यसन्यासाधिकारः अत्रस्त्रीणामप्यधिकारः जनकादीनांमैत्रेयीप्रभृतीनांतत्त्वविदांश्रुतिस्मृ
तीतिहासपुराणेषूपलंभात् · द्वितीयेतुदंडमात्रादानंकौपीनपरिग्रहश्चेष्टविसृजेत् · संसारमेवनिःसारंदृष्ट्वासारदिदृक्षया · प्रव्रजंत्यकृतोद्वा
हाः परंवैराग्यमाश्रिताइत्यादिवचनानिप्रमाणानि · गृहस्थाश्रमादेरेवकृतश्रवणादिभिः सन्ब्रह्मसाक्षात्कारेण गृहस्थादीनांचित्तविश्रांति
लक्षणजीवन्मुक्तिमुद्दिश्यक्रियमाणः सन्यासो विद्वत्सन्यासः · तमेतमेवंविदित्वामुनिर्भवति · अथयोगिनांपरमहंसानामित्यादिपरमहंसोपनिषदः
यदातुविदितंतत्स्यात्परंब्रह्मसनातनंतदैकदंडंसंगृह्यसोपवीतांशिखांत्यजेदित्यादिश्रुतिस्मृतिवचनानिप्रमाणानि · तत्राद्यसन्यासोजन्मांतरेपि १०
ज्ञानमुपकरोति · जनकादीनांतत्त्वविदांतत्त्वज्ञानोपलंभश्रुत्यादिषुयथातुरः स्यात्मनसावाचावासन्यसेदित्यातुरसन्यासविधानाच्च · आतु
रेतुविरक्तस्यैवाधिकारान्नमंत्रांतरं · अन्यथाप्रकरणविरोधप्रसंगात् · तदुक्तं · जन्मांतरेषुयदिसाधनजातमासीत्सन्यासपूर्वकमिदं

श्रवणादिकंच · विद्यामवाप्स्यतिजनः सकलोपियत्रतत्राश्रमादिषुवसन्निवार्यतामइति · तदेवंसर्वाधिकारिणः श्रवणादीनांतत्त्वज्ञानकारणत्वम
न्वयव्यतिरेकाभ्यांनिश्चिनोति · अहंध्येयश्रोतव्यइत्यादितव्यप्रत्ययइतिवाचस्पतिमिश्राः आचार्यास्त्वेवंवर्णयंति · यथोक्ताधिकृतस्य श्रोतव्यइत्या
दिवाक्यैर्दर्शनमुद्दिश्यमनननिदिध्यासनाभ्यांफलोपकार्यंगाभ्यांश्रवणंनामांगंविधीयते तस्यचदृष्टफलत्वान्नापूर्वविधिः अप्राप्तार्थविधाय
कोह्यपूर्वविधिः किंतुनियमविधिर्वापरिसंख्याविधिर्वा · विपक्षप्राप्तस्यप्राप्तांशपूरकोविधिर्नियमविधिः यथानखनिर्लुंठनेनव्रीहीनवहन्यादि
त्यवघातविधिः उभयत्रागप्राप्ते · पंचपंचनखाभक्ष्याः पंचनखानाम · शशकः शल्यकोगोधाखड्गीकूर्मश्चपंचमः · उभयप्राप्तावितरव्यावृत्ति
विधिः परिसंख्याविधिः यथेमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्तइतिगर्दभरशनाव्यावृत्तिविधिः एवंप्रकृतेपिजिज्ञासुर्वेदांतश्रव
णमेवकुर्यादितिनियमविधिः वेदांतश्रवणव्यतिरिक्तंनकुर्यादितिपरिसंख्याविधिर्वातदुक्तं · नियमः परिसंख्यावाविध्यर्थोऽस्यभवेद्यतः
अनात्मादर्शनेनैवपरात्मानमुपास्महेइति · तच्चश्रवणंसन्यासिनांनित्यं · नित्यकर्मपरित्यज्यवेदांतश्रवणंविना · वर्तमानस्तुसंन्यासीपतत्येवन
संशयइति · करणेप्रत्यवायश्रवणात् आसुप्तेरामृतेः कालंनयेद्वेदांतचिंतयेतिस्मृत्यायावज्जीवमग्निहोत्रंजुहुयादित्यादिश्रुत्याजीवनंनि
मित्तीकृत्याग्निहोत्रादिविधानवज्जीवनंनिमित्तीकृत्यश्रवणविधानात् · त्वंपदार्थविवेकायसन्यासः सर्वकर्मणां · श्रुत्याविधीयतेयस्मात्त
त्त्यागीपतितोभवेदिति · व्यवहारकर्मणः कारकस्यकरणेनतल्लक्षणाद्विक्षुरेषपातोभवेत् · संन्यासस्याव्यंजकस्यपरिवर्जनात्सोदंसद्यएवपति
तोनसंशयइति · वार्तिकाचार्यसंक्षेपशारीरकाचार्याभ्यांयाश्रवणादिरहितस्यसन्यासिनः पातित्याभिधानाच्च · गृहस्थादीनांश्रवणादिका

तत्त्वा.
११

भ्यांदिनेषु दिने तु वेदांतश्रवणाद्भक्तिसंयुतात् । गुरुशुश्रूषया लब्धात् कृच्छ्राशीतिफलं लभेत् । अन्ये तु वेदांतश्रवणे संन्यासिनश्चतुर्थस्यैवाधिका-
रात् गृहस्थादेः श्रवणाधिकार एव नास्ति । श्रुतिषु याज्ञवल्क्यजनकप्रभृतीनां तत्त्वज्ञानप्रतिपादकस्याख्याख्यातस्य ब्रह्मात्मनि तात्पर्याद्रसाथे
तात्पर्यमेव नास्तीत्याहुः । परं वैराग्ययुक्तेनस्यापि गुणोपेतस्यापि जिज्ञासेति याज्ञवल्क्य । तदुक्तं । ततः परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति । तच्चासंप्रज्ञा-
तसमाधेरंतरंगसाधनं । उक्तं च । तीव्रसंवेगानामासन्नः समाधिलाभ इति । अलमतिप्रसंगेन । एवं च सर्ववाक्यानामप्युपक्रमादिभिर्लिङ्गैस्ता-
त्पर्यनिश्चयः प्रकरणादीनामलौकिकवाक्यानां तात्पर्यनिर्णयः । एतादृशतात्पर्यानुपपत्तिः पूर्वोक्तलक्षणाबीजं । न तु तात्पर्यानुपपत्तिः । तस्याः यष्टीः
प्रवेशयेत्यादावसंभवात् । गंगायां घोष इत्यादौ तात्पर्यानुपपत्तेरसंभवात् । न केवलं लक्षणा पदमात्रवृत्तिः । किंतु वाक्यवृत्तिरपि । गंभीरायां नद्यां
घोष इत्यादौ पदसमुदायात्मकवाक्यान्तरे लक्षणास्वीकारात् । अत एवार्थवादवाक्यानां प्राशस्त्ये लक्षणा । अन्यथा पदान्तरैरपर्थ्यं स्यात् ।
अत एव प्राशस्त्यपदार्थप्रत्यायकत्वेनार्थवादवाक्यानां पदस्थानीयतया पदैकवाक्यत्वं स्वार्थे तात्पर्यवतां समिधो यजति दर्शपूर्णमासाभ्यां
स्वर्गकामो यजेतेत्यादिवाक्यानामुपकार्योपकारकाकांक्षया एकवाक्यत्वं वाक्यैकवाक्यत्वं । एवं चावान्तरवाक्यार्थज्ञानमित्यादि । वाक्यार्थज्ञाने न कार-
णं । तथान्वयव्यतिरेकानुविधानात् । एवं च यथोक्तसहकारिसंपन्नं वाक्यं परोक्षापरोक्षभेदेन द्विविधां प्रमामुत्पादयति । तत्र परोक्षार्थप्र- ११
तिपादकं वाक्यं परोक्षप्रमोत्पादकं । यथा स्वर्गकामो यजेत सदेव सोम्येदमग्र आसीद्ब्रह्मास्तीति वाक्यं । परोक्षत्वं नाम मानावृत्तसंवि-
त्तादात्म्याभावो योग्यस्य विषयस्य । धर्माधर्मयोरयोग्यतान्न प्रत्यक्षत्वं । अपरोक्षार्थप्रतिपादकं वाक्यमपरोक्षप्रमोत्पादकं । यथा दश-

शस्त्वमसि तत्त्वमसीत्यादिवाक्यं । अपरोक्षत्वं नामावृत्तसंविदात्म्यमनावृत्तसंवित्साक्षी चैतन्यं । अतःकरणावच्छिन्नं चैतन्यं साक्षी । तस्यावृतत्वे जगदांध्यप्रसंगः । तत्ता-
दात्म्यं नाम तद्भिन्नत्वे सति तदभिन्नसत्ताकत्वं । तथा च दशमस्त्वमसि त्वमसीत्यत्र दशमस्य त्वंपदार्थाभिन्नतयापरोक्षत्वेन वाक्याद्दशमापरोक्षप्रमैव जायते । दशमो-
ऽस्मीति । ननु वाक्यादपरोक्षज्ञाने मनसा नत्साक्षात्कारः मनसो नेंद्रियत्वस्योक्तत्वात् हृत्तिप्रत्यक्षपादने तेन कारणतायोगाच्च । प्रमाणजन्यापरोक्षज्ञानस्यैव भ्रमनिवर्तक-
त्वाच्च । एवं तत्त्वमसीत्यत्रापि तत्पदलक्ष्यस्य ब्रह्मणः त्वंपदलक्ष्यसाक्ष्यभिन्नतयानावृत्तसंवित्तादात्म्यान्नित्यापरोक्षत्वेन शोधितत्वंपदार्थस्याधिकारिणः मनननिदि-
ध्यासनसंस्कृतान्तःकरणस्य तत्त्वमस्यादिवाक्यादहं ब्रह्मास्मीत्यपरोक्षप्रमा जायते । एवं च सति सर्ववेदांतसदामनंतितं त्वौपनिषदं पुरुषं पृच्छामि नावेदवि-
न्मनुते तं बृहंतमित्यादिश्रुतयः सामंजस्येनोपपद्यंते । मनसैवानुद्रष्टव्यमित्यादिश्रुतिस्तु मनसो वाक्यसहकारित्वप्रतिपादनपरा । अन्यथा यन्मनसा न मनुते इ-
त्यादिश्रुतिविरोधप्रसंगात् । एवं शाब्दीप्रमा निरूपिता । अनुपपद्यमानार्थदर्शनात्तदुपपादकीभूतार्थकल्पनमर्थान्तरकल्पनमर्थापत्तिप्रमा । यथा दिवाभुंजानस्य दे-
वदत्तस्य रात्रिभोजनं विनानुपपद्यमानपीनत्वज्ञानात्तदुपपादकरात्रिभोजनकल्पनं । तत्रानुपपद्यमानपीनत्वज्ञानं कारणं रात्रिभोजनकल्पनं फलं । सा चार्थापत्ति-
द्विविधा । दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति । दृष्टार्थापत्तिः शुक्तौ इदं रजतमित्यनुभूयमानरजतस्य नेदं रजतमिति बाधितत्वं दृष्टं । तस्य मिथ्यात्वमंतरेणासत्त्वेनानुप-
पन्नं सन्मिथ्यात्वं कल्पयति । न चेदं रजतमिति ज्ञानद्वयं पुरोवर्तिनि प्रसक्त्यभावप्रसंगात् । रजतस्यासत्त्वे तज्ज्ञानस्य प्रत्यक्षत्वाभावप्रसंगात् । सत्त्वे बाधाभावप्रसंगात् । दे-
शान्तरसत्त्वे रजतेन्द्रियसन्निकर्षाभावेन प्रत्यक्षत्वाभावप्रसंगात् । रजतं साक्षात्करोमीत्यनुभवस्य सर्वानुभवसिद्धत्वात् । तस्माद्भ्रमकाले शुक्तिकायां रजतमुत्पद्य-
त इत्यंगीकर्तव्यं । रजतोत्पादकलौकिकसामग्र्यभावेऽपि पुरोवर्तीन्द्रियसन्निकर्षानंतरमिदमाकारवृत्त्यावच्छिन्नचैतन्यनिष्ठा शुक्तित्वप्रकारिकाविद्या साह-

तत्वानुसं·

१२

श्यदर्शनसमुद्बुद्धसंस्कारसहकृताज्ञानात्कारणज्ञानाकारेण परिणमते तस्य च मायाकार्यत्वात्तन्मिथ्यात्वं · एवं दृष्टार्थापत्तिर्निरूपिता · श्रुतार्थापत्तिर्यथा · तरति शोकमात्मविदित्यादिश्रुतिः शोकोपलक्षितप्रमातृत्वादिसंबंधस्याज्ञाननिवर्त्यत्वं श्रुतं तस्य मिथ्यात्वमंतरेण सत्यत्वमनुपपन्नं सन्मिथ्यात्वं कल्पयति · सेयं श्रुतार्थापत्तिः · अंतःकरणविशिष्टं चैतन्यं प्रमाता कर्त्ता भोक्ता केवलस्यात्मनोऽसंगत्वेन प्रमातृत्वाद्यनुपपत्तेः शुक्तिरजतवदात्माज्ञानादंतःकरणादिकं स्वरूपेण प्रत्यगात्मन्यध्यस्तं · अध्यासो नाम परत्र परावभासः स च द्विविधः · ज्ञानाध्यासोऽर्थाध्यासश्चेति · तत्रातस्मिंस्तद्बुद्धिर्ज्ञानाध्यासः यथा शुक्तौ रजतबुद्धिः यथा चात्मन्यनात्मबुद्धिः प्रमाणजन्यज्ञानविषयः पूर्वदृष्टः सजातीयोऽर्थाध्यासः सोऽपि द्विविधः प्रातीतिको व्यावहारिकश्चेति · तत्रागंतुकदोषजन्यः प्रातीतिकः यथा शुक्तिरजतादिः प्रातीतिकभिन्नो व्यावहारिकः यथाकाशादिघटांतं जगत्तथा च प्रमातृत्वादिसंबंधस्याध्यस्तत्वात्तया मिथ्यात्वमुपपद्यते · तदेतदभिप्रायेणोक्तं भगवता भाष्यकारेण स्मृतिरूपः परत्र पूर्वदृष्टः सजातीयावभास इति · अस्यार्थः स्मृतिरूपः संस्कारजन्यत्वेन स्मृतिसदृशः पूर्वदृष्टावभासः पूर्वदृष्टसजातीयावभास इति · ज्ञानाध्यासपक्षे · अर्थाध्यासपक्षे तु प्रमाणाजन्यज्ञानविषयः पूर्वदृष्टः सजातीय इति · एवं श्रुतार्थापत्तिर्निरूपिता · अभावप्रमा योग्यानुपलब्धिकरणिका · यथा घटानुपलब्ध्या घटाभावप्रमा भूतले जायते तत्रानुपलब्धिरेव करणं नेंद्रियं तस्याधिकरणग्रहोपक्षीणत्वादभावेन समं संनिकर्षाभावाच्च · असाधारणकारणं करणं · नियतपूर्ववर्त्ति कारणं तच्च द्विविधं उपादानकारणं निमित्तकारणं चेति · कार्यान्वितं कारणमुपादानं · यथा घटादेर्मृदादिः कार्यानुकूलव्यापारवन्निमित्तं यथा घटादेः कुलालादिः ब्रह्म तु मायोपहितं सत्प्रपंचस्योपाधिप्राधान्येनोपादानं स्वप्राधान्येन निमित्तं च भवति · तदैक्षत बहु स्यां प्रजायेयेत्यादिश्रुतेः प्रकृतिश्च प्रति १२

प्रतिज्ञादृष्टांतानुपरोधादिति सूत्राच्च · तच्च कारणं द्विविधं · साधारणमसाधारणं चेति · कार्यमात्रोत्पादकं साधारणं कारणं यथा दंडादिः · कार्यविशेषोत्पादकमसाधारणं कारणं यथा चाक्षुषादिप्रमायां चक्षुरादिः · तथा च घटाद्यभावप्रमायां घटाद्यनुपलब्धिरसाधारणं कारणं तदेव करणं · यद्यत्र घटः स्यादिति तर्कितेन प्रतियोगिसत्त्वेन तर्ह्युपलभ्येतेति प्रसंजितोपलब्धिरूपः प्रतियोगी यस्याः सा योग्यानुपलब्धिः तयाभावो गृह्यते · तत्रार्थापत्तिरिव तद्विषयोऽभावः सोऽत्यंताभाव एव एक एव भेदप्रमाण्याभावात् · तथाहि · सदेव सोम्येदमग्र आसीत् सत्त्वाच्चावरस्येति श्रुतिसूत्राभ्यां प्रागुत्पत्तेः कार्यस्य कारणात्मना सत्त्वप्रतिपादनेन प्रागभावस्य दुर्निरूपत्वात् · अनादिनित्यत्वेन त्रैकालिकान्योन्याभावस्य सत्त्वेऽद्वैतश्रुतिविरोधापत्तेः अत्यंताभाव एक एव · स च द्विविधः पारमार्थिको व्यावहारिकश्चेति · नेह नानास्ति किंचनेत्यादिश्रुतिप्रतिपादितः प्रपंचात्यंताभावः पारमार्थिकः स चाधिष्ठानरूपोऽधिष्ठानातिरिक्त इति केचित् · घटात्यंताभावो व्यावहारिकोऽयमेव भेदप्रतियोगिकः भूतलं घटो न स्यादिति प्रतीतिविषयः भेद इत्युच्यते · घटो नास्तीत्यादिविषयः अत्यंताभाव इत्युच्यते वादिभिः सर्वोऽप्यनित्य एव सर्वस्य ब्रह्मज्ञाननिवर्त्यत्वात् · अन्ये तु लौकिकत्वं तंत्रांतरबुद्धिमनुसरंतो भावभेदं स्वीचक्रुः · तथाहि · प्रागभावप्रध्वंसाभावात्यंताभावान्योन्याभावभेदाच्चतुर्विधोऽभावः उत्पत्तेः प्राक् कारणे कार्याभावः प्रागभावः यथा मृदादौ घटाद्यभावः उत्पन्नकार्यस्य कारणेऽभावो ध्वंसः यथा मुद्गरप्रहरणानंतरं कपालादौ घटाद्यभावः प्रतियोग्यसमानाधिकरणाभावोऽत्यंताभावः यथा भूतलादौ घटाद्यभावः प्रतियोगिसमानाधिकरणाभावोऽन्योन्याभावः यथा भूतलादौ घटभेदः सर्वेऽप्यभावा नित्याश्चेति · एवमभावप्रमा निरूपिता · एवं षड्विधप्रमया सावरणमज्ञानं निवर्त्तते तत्र परोक्षप्रमया सत्त्वापादकमौढ्याज्ञानं निवर्तते · अपरोक्षप्रमया सत्त्वाभानापादकाज्ञाननिवृत्तिः

तत्त्वानु·
१२

प्रभिन्नंज्ञाननिरुक्तिः प्रमाभिन्नंज्ञानमप्रमा· साचद्विविधा· स्मृतिरनुभूतिश्चेति· संस्कारमात्रजन्यज्ञानंस्मृतिः· सापिद्विविधा· यथार्थायथार्थाचेति· यथार्थस्मृ
तिरपिद्विविधा· आनात्मस्मृतिरात्मस्मृतिश्चेति· तत्रव्यावहारिकप्रपंचोमिथ्यादृश्यत्वाच्छुक्तिरूप्यवदित्यनुमानसिद्धमिथ्यात्वानुसंधानंयथार्थानात्म
स्मरणं· तत्त्वमस्यादिवाक्यार्थानुसंधानंयथार्थात्मस्मरणं· अयथार्थस्मृतिरपिद्विधापूर्ववत्· प्रपंचस्यसत्यत्वानुसंधानमयथार्था· अनात्मस्मरणंमिथ्यात्व
त्वात्तस्याहंकारादिष्वात्मत्वानुसंधानंआत्मनिकर्तृत्वानुसंधानंवायथार्थात्मस्मरणंस्वप्न - - - नुभवएवनस्मृतिरितिवक्ष्यते· स्मृतिभिन्नंज्ञानमनुभू
तिः साचद्विविधा· यथार्थायथार्थाचेति· यथार्थानुभूतिः प्रमासानिरूपिता· बाधितविषयानुभूतिरयथार्थासापिद्विविधा· संशयोनिश्चयश्चेति· एकस्मि
·धर्मिणिभासमानंनानाकोटिकज्ञानंसंशयः उक्तलक्षणस्यधर्मोन्नतप्रमायामतिव्याप्तिरित्याशंक्यलक्षणांतरमाह· स्वस्यैकांशेस्थाण्वाकारः स्थाणुत्वादिःत
द्वितीयाकारः पुरुषत्वादिः तदुभयवैशिष्ट्यज्ञानंस्थाणुर्वापुरुषोवेत्यादितद्विरुद्धज्ञानंसंशयः एकस्मिन्धर्मिणिस्वाकारविरुद्धज्ञानंसंशयइतिकेचित्· सच
द्विविधः प्रमाणसंशयः प्रमेयसंशयश्चेति· तत्रप्रमाणगतासंभवनाप्रमाणसंशयः यथानभ्यासदशायामभोत्पन्नंज्ञानंप्रमाणंनवेतिसंशयः सचप्रामाण्य
निश्चयान्निवर्तते· प्रामाण्यनिश्चयस्तुस्वतएव· प्रामाण्यंनामतद्वतितत्प्रकारकत्वं· तस्यस्वतस्त्वंनामयावत्स्वाश्रयग्राहकग्राह्यत्वं· स्वाश्रयोवृत्तिज्ञानंतद्ग्राहकंसा १२
क्षिचैतन्यंतन्निष्ठप्रामाण्यंगृह्यते प्रामाण्यंस्वतः अप्रामाण्यंपरतोगृह्यते· तत्रतदभाववतितत्प्रकारकत्वंतदभाववत्त्वस्यपरतिज्ञानानुपपत्तिस्तेनसाक्षिणाग्रही

तुमशक्यत्वात्परतएवाप्रामाण्यंगृह्यते· स्वतस्त्वपक्षेसंशयोदोषवशादुपपद्यतेइत्ययंप्रामाण्यसंशयः वेदांतोद्वितीयेब्रह्मणिप्रमाणंनवेतिसंशयः करणगतासंभवनासा
चश्रवणेननिवर्तते· तच्चनिरूपितं· तदपिशारीरश्रवणंशारीरकेप्रथमाध्यायपठनेननिष्पद्यते· प्रमेयगतासंभावनाद्विविधाअनात्मगतात्मगताचेति· स्थाणुर्वापुरुषोवे
त्यनात्मगतसंशयः आत्मगतसंशयोनेकविधः तथाहिब्रह्माद्वितीयंसद्वितीयंवाद्वितीयत्वेप्यानंदगुणकंवानंदस्वरूपंवाइत्यादिपरमात्मगतासंशयः आत्मादे
हाद्यतिरिक्तोवानवादेहाद्यतिरिक्तत्वेपिकर्तावाकर्तावाकर्तृत्वेपिचिद्रूपोवाचिद्रूपोवाचिद्रूपत्वेप्यानंदात्मकोवानवेत्यादिजीवगतसंशयः तज्जीवस्यसच्चिदा
नंदस्वरूपत्वेपिपरमात्मनासहैक्यंनसंभवतिनवाएक्येपिसंभवति तज्ज्ञानंमोक्षसाधनंनवामोक्षसाधनत्वेपिज्ञानंकर्मसमुच्चितंमोक्षसाधनंवाकेवलज्ञानंवेत्ये
क्यगतसंशयः अयंसर्वोपिसंशयोमननेनतर्कात्मकेननिवर्तते तर्कोनामात्मनिष्ठप्रसंगः व्याप्यारोपेणव्यापकापादनमितियावत्· व्याप्याश्रयोव्याप्यंव्याप्तिनि
रूपकंव्यापकं· तथाचयदिप्रपंचः सत्यः स्यात्तर्ह्यद्वितीयश्रुतिविरोधः स्यात्· यदिपरमात्माजीवभिन्नः स्यात्तर्हिघटादिवदनित्यत्वेनानित्यएवस्यात्· यद्यात्मनं
दोनस्यात्तर्हिकोपिनव्याप्रियेतेत्यादिव्याप्यारोपेणव्यापकप्रसंजनरूपास्तर्काः श्रुत्यनुकूलाद्रष्टव्याः एतच्चनिरूपितं· एतन्मननंशारीरकेद्वितीयाध्यायपठनेननि
ष्पद्यते· संशयविरोधिज्ञानंनिश्चयः सचद्विविधः यथार्थायथार्थश्चेति· अविसंवादियथार्थनिश्चयः सचोक्तएव· विसंवाद्ययथार्थनिश्चयः सचद्विविधः तर्कोवि

पर्ययश्चेति· तर्कस्तूक्त एव· विपर्ययो मिथ्याज्ञानमतस्मिंस्तद्बुद्धिरिति यावत्· स च द्विविधः निरुपाधिकः सोपाधिकश्चेति· तत्राद्यो द्विविधः बाह्यो अभ्यांतरश्चेति·
शुक्ताविदं रजतमित्यादिर्बाह्यः अहं ब्रह्म न जानामीत्याभ्यांतरः सोपाधिकोपि द्विविधः बाह्योभ्यंतरश्चेति· लोहितस्फटिक इत्यादिर्बाह्यः काश्यादिप्रपंचभ्रमो
पि बाह्यः सोपाधिकः कर्मा विद्याकार्यत्वात्· तत्त्वज्ञानिनो निरस्तेप्यज्ञाने प्रारब्धक्षयपर्यंतं प्रपंचोपलब्धिदर्शनात् कर्तृत्वादिभ्रमो अभ्यांतरः स्वप्नोप्याभ्यंतरः
सोपाधिकभ्रम एव न तु स्मृतिः तथाहि जाग्रद्भोगप्रदकर्मोपरमे सति स्वप्नभोगप्रदकर्मोद्रेके सकलविषयेंद्रियवासनावासितं निद्रादिदोषोपप्लुतमं
तःकरणं रथादिविषयाकारेण ग्राहकेंद्रियाद्याकारेण रथादिविषयाकारत्वाकारेण च परिणमते· अंतःकरणोपहितसाक्षिस्वयमनन्यानवभास्यः
तत्सर्वमवभासयति· अत एव स्वप्ने साक्षिणः स्वप्रकाशत्वं सुज्ञेयं जाग्रदवस्थायां सूर्यादितेजोभिः संकीर्णत्वात् साक्षिणः प्रकाशकत्वं दुर्विज्ञेयं· स्वप्ने तु
सूर्यादीनां जाग्रत्पदार्थानामुपरतत्वात् स्वप्रकाशत्वं विवेक्तुं शक्यते तथा च श्रुतिः स यत्र स्वपित्यस्य लोकस्य सर्वतो मात्रामुपादाय स्वयं विहृत्य स्वयं निर्माय
स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्योतिर्भवति· न तत्र रथा न रथयोगा न पंथानो भवंति· अथ रथान् रथयोगान् पथः सृजत इत्यादि स्वयंज्योतिः स्व
प्रकाशचैतन्याविषय इति यावत्· एवं स्वप्नेनुभवरूप एव न स्मृतिः अन्यथा स्वप्नपश्यामीत्यनुभवविरोधप्रसंगात्· स्वप्नपदार्थानामंतःकरणमायाद्वा १४
राश्रुद्धचैतन्याध्यस्तत्वेन इदानींतनसाक्षात्काराभावेन बाधाभावेपि सोपाधिकत्वं सोपाधिनिवृत्त्या तन्निवृत्तिरिति न जाग्रदवस्थायामनुवृत्तिः कर्मनिद्राप

प्लुतमंतःकरणमुपाधिः केचित्तु स्वप्नाध्यासं निरुपाधिकं वदंति तत्र विरोधि जाग्रत्प्रत्ययेन तन्निवृत्तिः पुनश्च विपर्ययः प्रकारांतरेण द्विविधः अंतःकरणनि
वृत्तिरूपो विद्यावृत्तिरूपश्चेति· संशयादेरंतःकरणवृत्तिरूपः रजतादिभ्रमो विद्यावृत्तिरूपः संशयस्तु विचारेणैव· तत्रैवं सति निरुपाधिकविपर्ययादि[illegible]
ध्यासनेन निवर्त्तते· सोपाधिकस्तूपाधिनिवृत्त्या निवर्त्तते· निदिध्यासनं निरूपितमेव· तदपि शारीरके तृतीयाध्यायपठनेन निष्पद्यते· एवं च श्रवणमनन
निदिध्यासनैरसंभावनाविपरीतभावनानिवृत्तौ असत्यस्मिन्प्रतिबंधे तत्त्वमस्यादिवाक्यादहं ब्रह्मास्मीत्यपरोक्षप्रमा जायते· तदुक्तं· [illegible]
तिबंधे तद्दर्शनादिति· प्रतिबंधस्त्रिविधो भूतभाविवर्त्तमानभेदात्· भूतप्रतिबंधः पुनर्वानुभूतविषयस्यावश्येन पुनः पुनः स्मरणं· तदुपाधिक[illegible]
नुसंधानेन तन्निवृत्तिर्यथा· भिक्षोः पूर्वानुभूतमहिष्यादिस्मरणेन तत्त्वज्ञानानुत्पत्तौ गुरूपदिष्टतदुपाधिकब्रह्मानुसंधानेन तन्निवृत्ति[illegible]
प्रतिबंधो द्विविधः प्रारब्धत्रो ब्रह्मलोकेच्छा चेति· तत्र प्रारब्धं कर्म द्विविधं· फलाभिसंधिकृतं लौकिकं चेति· तत्र फलाभिसंधि[illegible]
तस्मिन्सति ज्ञानं नोत्पद्यते· तस्य प्रबलत्वात्· तथा च श्रुतिः स यथाकामो भवति· तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते [illegible]
द्वितीयो भाविप्रतिबंधः केवलं प्रारब्धं तत्त्वज्ञानहेतुः पापनिवृत्तिद्वारा· तथा च श्रुतिस्मृती तिरेमे पापमनुचरंति· [illegible]
पद्यते कषायकर्मभिः पक्वे ततो ज्ञानं प्रवर्त्तत इति· भाविप्रतिबंधस्य प्रारब्धत्रोपस्य भोगेन निवृत्तौ सत्यां [illegible]

तिबंधो वा इति वामदेवे समीरितः एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिरिति ब्रह्मलोके छाया ब्रह्मसाक्षात्कारोत्पत्तौ प्रतिबंधकसंविद्यारण्यस्वामिनो वदंति स्म
ब्रह्मलोकाभिवांछायां सम्यक्सत्यां निरुध्यतां विचारयेद्य आत्मानं न तु साक्षात्करोत्ययमिति पुनर्वेदांतश्रवणादिमहिम्ना ब्रह्मलोकं गत्वा निर्गुणं ब्रह्म
साक्षात्करोति तथा च श्रुतिः वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः ते ब्रह्मलोके तु परांतकाले परामृताः परिमुच्यंति सर्वे इति स पुनः
स्त्वत्रैव मुच्यते वर्तमानप्रतिबंधं तन्निरूपयाम विद्यारण्यस्वामिनो वर्णयांचक्रुः प्रतिबंधो वर्तमानो विषयासक्तिलक्षणः प्रज्ञामांद्यं कुतर्कश्च विपर्ययदुराग्रहः
रामाद्यैः श्रवणाद्यैर्वा तत्र तत्रोचितैः क्षयं नीतेस्मिन्प्रतिबंधेतः स्वस्य ब्रह्मत्वमश्नुते इति ततः श्रवणादिभिः सकलप्रतिबंधकनिरसनाद्वा क्वाप्यद्य ब्रह्मसा
क्षात्कारो ह्यसौ तत्र शमदमउपरतितितिक्षाश्रद्धासमाधाना अंतरंगसाधनानि अंतरिंद्रियनिग्रहः शमः बाह्येंद्रियनिग्रहो दमः उपरतिः संन्यासः ति
तिक्षा द्वंद्वसहिष्णुता श्रद्धा गुरुवेदांतवाक्येषु विश्वासः समाधानं श्रवणादिषु चित्तैकाग्र्यं शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं
पश्येदिति श्रुतेः सूत्रकारोप्याह शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदंगतया तदवश्यानुष्ठेयत्वादिति यज्ञादयो बहिरंगसाधनानि तमेतं वेदानुवच
नेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेत्यादिश्रुतेः सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति सूत्रमुक्तं तमेव मननादिसंस्कृतचित्त
दर्पणसंक्रांतं विचारितमहावाक्योत्पन्नेनाहं ब्रह्मास्मीत्यपरोक्षब्रह्मसाक्षात्कारेणाज्ञाननिवृत्तौ संचितकर्मणां नष्टत्वादागामिकर्मणामाश्ले १५
षादारब्धोपादितविषयमनुभवन्मुमुक्षुरेव देहकरणसंघे चिदानंदब्रह्मात्मनावतिष्ठते एतादृशं फलं चतुर्ध्यायपठनेन निष्पद्यत इति सांप्रदायिकानां
रीतिः अन्ये तु गुरुमुखात्संहरणं शास्त्रपठनं श्रवणं तस्य पठितस्य युक्तिभिरनुसंधानं मननं तस्यैव पुनः पुनरावृत्तिर्निदिध्यासनं अनंतरं साक्षात्कार इ

त्याहुः वस्तुतस्तु शुद्धसत्वानां मुख्याधिकारिणां श्रुतमात्राणामस्तु मन्वानानां च श्लोकेन श्लोकार्धेन वा ब्रह्मसाक्षात्कारो भवत्येव शब्दस्य चित्वशक्तित्वात् शास्त्रस्य च शरीर
कादेर्मुख्याधिकारिविषयत्वोपपत्तेः तदुक्तं महाभारते आत्मानं विंदते यस्तु सर्वभूतगुहाशयं श्लोकेन यदि वार्धेन क्षीणं तस्य प्रयोजनमिति सांप्रदायिकैरप्युक्तं
तत्र विशद्दूरस्तु गुः श्वेतकेतुः पिशाचश्चेति चत्वारः शिष्याः तेषु श्वेतकेतोरहस्यपक्षयामपि अन्येषां तदभावान्मुख्याधिकारिण श्लोकेनैव ज्ञानमित्युक्तं वाक्यश्रव
णमात्रेणापि इंद्रवद्वा गुर्वादिवदिति एतावानेव विशेषः अत्युत्तमानां परं तं च प्रज्ञत्वादसंभावनादिसंभवाद्ध्याननिष्ठापेक्षिता तदुक्तं अन्ये त्वेवमजानंतः श्रु
त्वान्येभ्य उपासते तेपि चातितरंत्येव मृत्युं श्रुति[illegible]परायणा इति विद्यारण्यैरप्युक्तं अत्यंतबुद्धिमांद्याद्वा सामग्र्या वाप्यसंभवात् यो विचारं न लभते ब्रह्मोपासीत सो
निशमिति मरणे ब्रह्मलोके वा ततः ज्ञात्वा विमुच्यते इति च पंचांजलिनाप्युक्तं ततः प्रत्यक्चेतनाधिगमोऽप्यंतरायाभावश्चेति प्रमाकुशलानां संज्ञायादिप्रस्ता
नां पंडितानामपि ध्याननिष्ठापेक्षिता तदुक्तं अपि संराधने प्रत्यक्षानुमानाभ्यामिति अन्यत्राप्युक्तं बहुव्याकुलचित्तानां विचारात्तत्त्वधीर्न चेत् योगो मुख्य
स्तेषां धीदर्पस्तेन नश्यतीति संशयादिरहितानां ध्याननिष्ठा चेत्स्यात्तर्हि सुखं तदुक्तं अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते तेषां युक्ताभियुक्तानां योगक्षे
मं वहाम्यहं मच्चित्ता मद्गतप्राणा बोधयंतः परस्परं कथयंतश्च मां नित्यं तुष्यंति च रमंति चेति ननु ज्ञानिनो ध्यानविधिः देहाभिमानशून्यतया कर्तृत्वाभा
वेन तस्य विधिकिंकरत्वायोगात् तदुक्तं अनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवदिति भाष्यकारैरप्युक्तं अहं ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः सर्वाणि च
शास्त्राणि विधिप्रतिषेधमोक्षपराणि देहेंद्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेरिति च गौणमिथ्यात्मनोसत्वे पुत्रदेहा
दिबाधनात् ब्रह्मात्माहमस्मीति बोधे कार्यं कथं भवेदित्युक्तं ज्ञानिनो ध्यानाभावे व्यवहारप्राचुर्यात् दृष्टदुःखमात्रं न मोक्षप्रतिबंधः तदुक्तं तन्निष्ठस्य मोक्षोपदे

तत्त्वानु॰ शादिति तस्मिन्ब्रह्मात्मनि निष्प्रपञ्चे व्यापारतया परिसमाप्तिः पर्यवसानं यस्य स तथा तस्य ज्ञानैककारणस्येति यावत् · तथा भगवानप्याह · यस्त्वं वेत्ति पुरुषं च
१८ प्रकृतिं च गुणैः सह · सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते · यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते · हत्वापि स इमांल्लोकान्नायं हन्ति न हन्यते · शैवेऽपि · हय
मेधशतसहस्राण्यपि कुरुते ब्रह्मघातलक्षाणि च · परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते विमलाशय इति · विद्यारण्यैरप्युक्तं · पूर्णबोधे तदन्यौ द्वौ प्रतिबद्धो
यदा तदा मोक्षो विनिश्चितः · किंतु दृष्टदुःखं न नश्यतीति बोधस्य पूर्णतावधिः · विष्णुपुराणे दर्शितः · अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्य
जातं · ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा द्वन्द्वगदा भवन्तीति · ब्रह्मगीतायां ब्रह्माणं प्रति शिवेनापि · अहं हि सर्वं न च किंचिदन्यन्निरूपणाया मनिरूपणा
यां इयं वेदस्य पराहि निष्ठा ममानुभूतिश्च न संशयश्चेति · उपदेशसाहस्रिकायामपि · देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं · आत्मन्येव भवेद्यस्य स नेच्छन्न
पि मुच्यत इति · अयमस्मीति पुरुषमित्यत्रायमिति श्रुतेः तात्पर्यप्रतिपादनव्याजेन विद्यारण्यैरपि दर्शितं तत्त्वदीपे · असंदिग्धाविपर्यस्तबोधाद्देहात्म
निश्चिते · तद्वदात्मनि निर्णेतुमयमित्युच्यते पुनरिति सर्वथापि श्रवणादिना ब्रह्मसाक्षात्कारः ततो ब्रह्मभावलक्षणा मुक्तिर्भवतीति सिद्धं · तमेव विदित्वाति
मृत्युमेति तरति शोकमात्मविद् ब्रह्मविद्ब्रह्मैव भवति · एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपं संपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः
आत्मानं चेद्विजानीयादयमस्मीति पुरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदिति · यत्क्षणान्ते दृढबोधस्तत्क्षणाद्ब्रह्माहमस्मीति कृतकृत्यो भवतीति · एतद्बुद्ध्वा १८
बुद्धिमान्स्यात्कृतकृत्यश्च भारतेत्यादिस्मृतिभ्यः · शेषोऽपि शिक्षाश्चाच्युतपादोऽथ इदं निष्ठन्नपि क्षितौपत्तिः · तद्गुणपुरुषज्ञो विद्वन्नपि केवली भवती

ति · सा च मुक्तिर्द्विविधा · विदेहमुक्तिर्जीवन्मुक्तिश्चेति · तत्र ततः ज्ञानिनो भोगेन प्रारब्धकर्मक्षये वर्तमानशरीरपातो विदेहमुक्तिस्तदुक्तं · भोगेन त्वितरे क्षपयि
त्वा संपद्यत इति · अन्ये तु भाविशरीरानारंभो विदेहमुक्तिः · सा च ज्ञानोत्पत्तिसमकालं ज्ञानेनाज्ञाननिवृत्तेः संचितकर्मणां नाशादागामिकर्मणामश्लेषाद्भो
गेन प्रारब्धक्षयाच्छरीरारंभो विदेहमुक्तिः · भक्तस्यासंभवाद्भाविशरीरानारंभकस्य ज्ञानसमकालं संयुज्यते · तदुक्तं · तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परि
त्यजन्देहं · ज्ञानसमकालमुक्तः कैवल्यं याति हतशोक इति · एवं वर्णयांचक्रुः · श्रवणादिभिरुत्पन्नसाक्षात्कारस्य विद्वत्संन्यासिनः कर्तृत्वाद्यखिलबंधप्रति
भासनिवृत्तिर्जीवन्मुक्तिः · जीवदवस्थायामिति शेषः · अन्यथा विदेहमुक्तावतिव्याप्तिः स्यात् · भोगायदिकर्म प्रारब्धप्राबल्याद्यपि योगाभ्यासेन तदभिभ
वसंभवात् · प्रारब्धापेक्षया भोगाभ्यासस्य प्रबलत्वात् · अन्यथा पुरुषप्रयत्नैः सेयथैर्न चिकित्साशास्त्रमारभ्यामोक्षशास्त्रपर्यंतस्यानारंभप्रसंगात् ·
अत एव पुरुषप्रयत्नस्य साफल्यमाह वसिष्ठः · आबाल्यादलमभ्यस्तैः शास्त्रसत्संगमादिभिः · गुणैः पुरुषयत्नेन सोऽर्थः संप्राप्यते हित इति · तत्र श्रुतिस्मृतीति
हासपुराणवचनानि प्रमाणानि · विमुक्तश्च विमुच्यत इति श्रुतिः · यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते · यस्य निर्वासनो बोधः स जीवन्मुक्त उ
च्यत इति वसिष्ठः · प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् · आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते · अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च · नि
र्ममो निरहंकारः समदुःखसुखः क्षमी · संतुष्टः सततं योगी यतात्मा दृढनिश्चयः · मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रिय इति · अत्र जीवन्मुक्तउच

तेत्वानु॰
११

ते॰ प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव। न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति। स उच्यत इत्यर्थः। तेन यथा स्वप्नप्रपंचोऽयं मयि मायाविजृंभितः। एवं जाग्रत्प्रपंचोऽयं मयि मायाविजृंभितः। जीवन्मुक्तिर्दर्शिता।
निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः। शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषं। अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः। ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः। इति महारते। यथा स्वप्नप्रपंचोऽयं मयि मायाविजृंभितः। एवं जाग्रत्प्रपंचोऽयं म
यि मायाविजृंभितः। इति यो वेद वेदांते सोऽतिवर्णाश्रमी भवेदिति पुराणे। सेयं जीवन्मुक्तिः। तत्त्वज्ञानं वासनाक्षयो मनोनाशश्चाभ्यासात्सिध्यति। उत्पन्नस्यात
त्त्वज्ञानस्याभ्यासो नाम पुनः पुनः केनाप्युपायेन तत्त्वानुसंधानं। तदुक्तं। तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं। एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बु
धा इति। यद्यपि तत्त्वज्ञानात्प्रागपि वासनाक्षयो मनोनाशाभ्यासोऽपेक्षितः तथापि विविदिषासंन्यासिनः सोपसर्जनभूतः श्रवणाद्यभ्या
सस्तु प्रधानः। तद्वत्संन्यासिनस्तु तत्त्वज्ञानाभ्यासोपसर्जनभूतः वासनाक्षयमनोनाशाभ्यासः प्रधान इत्यविरोधः। उत्तोपात्तिकस्य मुख्या
धिकारिणः तदपेक्षाभावे प्रकृतोपासते रसमदोस्तदभावे चित्तविश्रान्त्यभावादुत्पन्नमपि तत्त्वज्ञानं विषयाबाधात्। प्रमाणमज्ञाननिव
र्तकमप्यसंभावनादिसंभवान्न सुखकरमिति वासनाक्षयो मनोनाशाभ्यासोऽपेक्षितः। वासनासामान्यलक्षणं तद्विभागं तत्प्रयो
जनं तल्लक्षणं च वसिष्ठ आह। दृढभावनया त्यक्तपूर्वापरविचारणं। यदादानं पदार्थस्य वासना सा प्रकीर्तिता। वासना द्वि ११
विधा प्रोक्ता शुद्धा च मलिनी तथा। मलिना जन्महेतुः स्याच्छुद्धा जन्मविनाशिनी। अज्ञानसुघनाकारा घनाहंका

रशालिनी। पुनर्जन्मकरी प्रोक्ता मलिना वासना बुधैः। पुनर्जन्मांकुरं त्यक्त्वा स्थिता संभृष्टबीजवत्। देहार्थं ध्रियते देहे ज्ञातज्ञेया शुद्धेति
चोच्यते इति। तत्र मलिनवासना जन्महेतवोऽनेकप्रकाराः दर्शिताः। लोकवासनया जंतोर्देहवासनयापि च। शास्त्रवासनया ज्ञानं यथाव
न्नैव जायते इति। दंभो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च। अज्ञानं चाभिजातस्य पार्थ संपदमासुरीमिति च। योषित्पुत्रादिविषयाभि
लाषाश्च मलीनवासना द्रष्टव्या। विवेकदोषदर्शनतत्संगसंनिधित्यागप्रतिकूलवासनोत्पादनेनोक्तानां मलिनानामंतःकर
णगतानामनुत्पादो वासनाक्षयाभ्यासः। तथैव वसिष्ठादिभिर्दर्शितः। दृश्यासंभववोधेन रागद्वेषादितानव। रतिर्नवोदिता जातु बोधा
भ्यासं विदुः परमिति। असंगोऽहमिति व्यवहारोऽस्यास्तीति तस्य भावस्तत्त्वं। असंगव्यवहारित्वाद्भवभावनवर्जनात्। शरीरनाशदर्शित्वाद्वास
ना न प्रवर्तते इति च। दुःखं जन्म जरा दुःखं दुःखं मृत्युः पुनः पुनः। संसारमंडलं दुःखं पच्यंते यत्र जंतव इतीति हासेनिः संगता मुक्तिपदं यती
नां संगादशेषाः प्रभवंति दोषाः। आरूढयोगोऽपि निपात्यतेऽधः संयोगेन योगी किमुताल्पसिद्धिरिति विष्णुपुराणे। तथा भागवते संगं त्य
जेत मिथुनव्रतीनां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिंद्रियाणि। एकश्चरहरेद्रहसि चित्तमनंत ईशे युंजीत तद्व्रतिषु साधुषु चेत्प्रसंग इति।
स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान्। क्षेमे विविक्त आसीनो। चिंतयेन्मामतंद्रितमिति च। महत्सेवां द्वारमाहुर्विमुक्तेस्तमो द्वारं

योषितां संगं। महांतस्ते समचित्ताः प्रशांता निमन्यवः सुहृदः साधवो ये इति च तत्संगे पातित्यमाह॥ योषिद्धिरण्याभरणांबरादिद्रव्येषु
मायानचितेषु मूढः। प्रलोभितात्मा ह्युपभोगबुध्या पतंगवन्नश्यति नष्टदृष्टिरिति॥ प्रतिकूलवासनानां मैत्र्यादिवासनाश्च दर्शिता॥ मैत्री
करुणामुदितोपेक्षाणां सुखदुःखपुण्यपापविषयाणां भावनातः चित्तप्रसादनमिति॥ अस्यार्थः सुखी प्राणिषु एते मदीया इति मैत्री दुः
खी प्राणिषु यथा मम दुःखं माभूदेवमन्येषां माभूदिति करुणा॥ पुण्यकारिषु पुरुषेषु मुदितां पापेषूपेक्षां भावयतः रागद्वेषासूयामदमा
त्सर्यादिनिवृत्त्या चित्तप्रसादो भवतीति॥ तथा दैवीसंपदभ्यासेनासुरसंपन्नश्यतीति दैवीसंपद्भगवद्दर्शिता॥ अभयं सत्वसंशुद्धिरित्यारभ्य दै
वीमभिजातस्येत्यंतेन॥ अमानित्वमित्यादिनोक्तान्धर्मान्नभ्यसेत्॥ अमानित्वादिधर्माभ्यासेन तद्विपरीतमानादयो नश्यंति॥ तथा च
मैत्र्यादिवासनां संकल्पपूर्वकामभ्यस्य अनंतरमजिह्वत्वादिधर्मानभ्यसेत्॥ अजिह्वत्वादयो दर्शिताः अजिह्वः षंढकः पंगुरंधो बधिर एव
च। मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न संशयः। इदमिष्टमिदं नेति योऽश्नन्नपि न सज्जते। हितं सत्यं मितं वक्ति तमजिह्वं प्रचक्षते। अद्यजा १८
तां यथा नारीं तथा षोडशवार्षिकीं शतवर्षां च यो दृष्ट्वा निर्विकारः स षंढकः॥ भिक्षार्थमटनं यत्र विण्मूत्रकरणाय च। योजनान्न परं याति स
र्वथा पंगुरेव सः॥ तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगं। चतुर्युगां भुवं मुक्त्वा परिव्राट् सोंध उच्यते। हिताहितं मनोरामं वचः शोकापहं च यत्॥

श्रुत्वापि न शृणोतीह बधिरः स प्रकीर्तितः। सान्निध्ये विषयाणां च समर्थो विकलेंद्रियः सुप्तवद्वर्तते नित्यं स भिक्षुर्मुग्ध उच्यते इति॥ तदनंतरं
चिन्मात्रवासनामभ्यसेत्॥ नामरूपात्मकस्य जगतः चैतन्ये कल्पितत्वे स्थितः तत्ताशून्यतया चैतन्यसत्तास्फुरणपूर्वकमेव स्फुरणं भवति॥ अ
त्र नामरूपे मिथ्यात्वनिश्चयेनोपेक्ष्य चिन्मात्रोहमिति भावयेत्॥ सेयं चिन्मात्रवासना द्विप्रकारा॥ कर्तृकर्मकरणपूर्विका केवला चेति॥ तत्र सर्वं
जगच्चिन्मात्रमहं मनसा भावयामीति क्रियमाणा प्रथमा सा संप्रज्ञातसमाधिकोटावंतर्भवति॥ कर्तृकर्मकरणानुसंधानरहिता चिन्मात्रोहमि
ति भावना केवला॥ सर्वस्य चिन्मात्रत्वं श्रुत्युक्ते बहुलिंगत्वेनोपदिष्टं॥ चिदिहास्तीह चिन्मात्रं सर्वं चिन्मयमेव तत् चित्त्वं चिदहमेवेति लोकाश्चिदिति सग्र
हः द्वितीया संप्रज्ञातसमाधिकोटावंतर्भवति तस्यां चिन्मात्रवासनायां दृढतयाभ्यस्तायां पूर्वोक्तमलिनवासनाः सर्वाः क्षीयंते इयं वासनाक्ष
याभ्यासः यत्तु सुवर्णादिवत्सावयवं कामादिवृत्तिरूपेण परिणममानमंतः करणं मननात्मकत्वान्मनः तच्च सत्वरजस्तमोगुणात्मकं तदाश्र
यत्वेन सत्वरजस्तमोविकाराणां सुखदुःखमोहादीनामुपलंभात् रजस्तमोवृत्तिभिरुपचीयमानमंतः करणं पीनमात्मदर्शनायोग्यं भ
वतीयतस्तदर्थं वृत्तिनिरोधेनेह सूक्ष्मतापादनं मनोनाशः इत्युच्यते॥ तत्साधनानि द्वादश दर्शितानि॥ अध्यात्मविद्याधिगमः साधुसंगम एव च॥
वासनासंपरित्यागः प्राणस्पंदनिरोधनं॥ एतास्ता युक्तयः पुष्टाः संति चित्तजये किलेति॥ प्राणनिरोधोपायोपि दर्शितः। प्राणायामदृढाभ्यासा

तत्वानु १९ द्युत्याच गुरुदत्तया। आसनाशनयोगेन प्राणस्पंदो निरुध्यत इति॰ प्राणायामप्रकारो दर्शितः। इडया पिब षोडशभिः पवनं चतुरुत्तरषष्टिमोदरिकं। त्यज
पिंगलया शकैः शनकैर्दशभिर्दशभिर्द्व्यधिकैरिति॰ इडया वामनासिकया। पिब पूरय त्यज रेचय पिंगलया दक्षिणनासिकयेत्यक्षरार्थः। प्राणाया
मस्य मस्य मनोनाशत्वोपायश्रुतावप्युक्तं॰ प्राणान्प्रतिपीडयेह स युक्तचेष्टः क्षीणे प्राणे नासिकया छ्वसीत दुष्टाश्वयुक्तमिव वाहमेनं विद्वान्मयो
धारयेता अप्रमत्त इति॰ आसनं योगं तत्साधनं तत्फलं पतंजलिः सूत्रयत् स्थिरसुखमासनं प्रयत्नशैथिल्यानंतरमापत्तिभ्यां ततो द्वंद्वानभिघात
इति॰ प्रयत्नशैथिल्यं लौकिकवैदिकवैदिककर्मत्यागः फणासहस्रेण धरणीं धृत्वा योऽनंतो वर्तते स एवाहमस्मीत्यनुसंधानं॰ अनंतसमापत्तिरनाया
सेन प्रतिबंधकदुरितं क्षीयते॰ आसनाभ्यासस्य फलं द्वंद्वनिवृत्तिः आसनयोगोपि दर्शितः। द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत्॰ मरुतः प्रचारणा
र्थाय चतुर्थमवशेषयेदिति॰ एवं प्राणायामादिना प्राणस्पंदनिरोधे खिलाश्चित्तवृत्तयो निरुध्यंते॰ प्राणस्पंदाधीनत्वाच्चित्तहृत्स्फुरणस्य ततश्च स्वभा
वत आत्मनात्माकारमंतःकरणमनात्माकारवृत्तिनिरोधादात्मैक्याकारं भवति तथाहुः आत्मानात्माकारं स्वभावतोऽवस्थितं चित्तं आत्मैक्याका
रतयातिकृतानात्मवृत्तिर्विवृद्धीन इति॰ अयमेव मे योगः तदाहुः योगश्चित्तवृत्तिनिरोध इति तत्साधनं चाहुः अभ्यासवैराग्याभ्यां तन्निरोध इति॰ १९
भगवानपि तत्राह॰ असंशयं महाबाहो मनो दुर्निग्रहं चलं। अभ्यासेन तु कौंतेय वैराग्येण च गृह्यत इति॰ वैराग्यं निरूपितं॰ निरोधो द्विविधः संप्र

ज्ञातोऽसंप्रज्ञातश्चेति॰ कर्त्राद्यनुसंधानं विना लक्ष्यैकगोचरप्रत्ययप्रवाहः संप्रज्ञातसमाधिः यथाहुः विलाप्य विकृतिं कृत्स्नां संभवव्यत्ययक्रमा
त्। परिशिष्टं तु चिन्मात्रं सदानंदं विचिंतयेत्॰ ब्रह्माकारो मनोवृत्तिप्रवाहोऽहंकृतिं विना॥ संप्रज्ञातसमाधिः स्याद्ध्यानाभ्यासप्रकर्षक इति॰ अस्या
संप्रज्ञातसमाधेरंगिनः यमादीन्यष्टांगानि॰ तत्र यमनियमासनप्राणायामप्रत्याहाराः बहिरंगानि॰ अहिंसासत्यमस्तेयब्रह्मचर्यपरिग्रहाः य
माः अष्टांगमैथुनवर्जं ब्रह्मचर्यं॰ यथाहुः स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं। संकल्पोऽध्यवसायश्च क्रियानिवृत्तिरेव च॥ एतन्मैथुन
मष्टांगं प्रवदंति मनीषिणः। विपरीतं ब्रह्मचर्यमनुष्ठेयं मुमुक्षुभिः। तत्संगसंन्निधित्यागी दोषदर्शी न केऽभवेदिति॰ अत एव स्त्रीभाषादि
निषेधोपि मुमुक्षूणां॰ न संभाषेत्स्त्रियं कांचित्पूर्वदृष्टां न च स्मरेत्॰ कथां च वर्जयेत्तासां न पश्येल्लिखितामपीत्यादिस्मृतौ॰ शौचसंतोषतपः
स्वाध्यायेश्वरप्रणिधानानि नियमाः। आसनं निरूपितं॰ तच्च पद्मकस्वस्तिकाद्यनेकप्रकारं॰ रेचकपूरककुंभकाः प्राणायामाः इंद्रियाणां वि
षयेभ्यो निवर्तनं प्रत्याहारः एतेषु बहिरंगेषु जितेषु अंतरंगेषु प्रयत्नः कर्तव्यः धारणाध्यानसमाधयः संप्रज्ञातसमाधेरंतरंगसाधनानि
धारणा नाम मूलाधारमणिपूरस्वाधिष्ठानानाहताज्ञाविशुद्धिदेशानामन्यतरस्मिन् प्रत्यगात्मनि वा चित्तस्य स्थापनं॰ तदेकस्मरणमि
ति यावत्॰ ध्यानं नाम तत्र प्रत्ययैकतानता लक्ष्यैकगोचरप्रत्ययप्रवाह इति एतत्प्रत्ययप्रवाहो द्विविधः विजातीयप्रत्ययांतरितस्तदनंतरि

तत्वानु तश्चेति· आद्योऽध्याद्द्वितीयोसमाधिःसोपद्विविधः कर्त्राद्यनुसंधानपूर्वकतद्रहितश्चेति· आद्योंगमसमाधिः द्वितीयोंगी· संप्रज्ञात
२० समाध्युदयेलयविक्षेपकषायरसास्वादाः चत्वारोविघ्नाःसंति· लयोनिद्रा·पुनःपुनःविषयानुसंधानंविक्षेपःचित्तस्यरागादिनास्त
ब्धीभावःकषायः समाध्यारंभसमयेसविकल्पकानंदास्वादोरसास्वादः यथाहुःलयेसंबोधयेच्चित्तंविक्षिप्तंशमयेत्पुनः।सकषा
यंविजानीयात्समप्राप्तंनचालयेत्॥नास्वादयेद्रसंतत्रनिःसंगःप्रज्ञयाभवेदित्यस्यार्थः प्राणायामादिनालयाभिमुखंचित्तमुत्था
पयेत्·दोषदर्शनब्रह्मानुसंधानादिनाविक्षिप्तंचित्तंशमयेत्·ब्रह्मसंप्राप्तंचित्तंनचालयेत्समाध्यारंभसमयेसविकल्पकानंदं
नास्वादयेत्·किंतूदासीनब्रह्मप्रज्ञयायुक्तोभवेदिति·एवंनिर्विघ्नेनसंप्रज्ञातसमाध्यभ्यासेनाध्यात्मप्रसादमापनेमनसिऋतंभ
राप्रज्ञोदेति·अतीतानागतविप्रकृष्टव्यवहितसूक्ष्मवस्तुविषयंयोगिप्रत्यक्षंऋतंभराप्रज्ञा·तामपिनिरुध्यसमाधिमभ्यसतःगुण
वैतृष्ण्यंपरंवैराग्यंउदेति·तच्चनिरूपितं·ततोऽभ्यासःकर्तव्यो त्साहप्रयत्नः अभ्यासः तत्रस्थितोऽभ्यासइति·तस्यापिनिरोधेसर्व
धीनिरोधोभवति·अयमेवासंप्रज्ञातसमाधिः नकेवलंपरवैराग्यादेवसमाधिलाभः किंत्वीश्वरप्रणिधानादपि·तथाचोक्तं·ईश्वरप्र २०
णिधानाद्वाक्लेशकर्मविपाकाशयैरपरामृष्टःपुरुषविशेषईश्वरःतस्यवाचकःप्रणवःतज्जपस्तदर्थभावनमिति·तदुक्तंभवतीश्वरप्रणिधा

नाद्वासमाधिलाभः क्लेशादिभिरसंबधःसर्वज्ञःसर्वशक्तीश्वरः ईश्वरस्याभिधायकःशब्दःप्रणवःप्रणवजपमांडूक्योपनिषत्पंचीकरवार्तिको
क्तप्रकारेणचार्थानुसंधानंचेश्वरप्रणिधानं· अथवादत्तद्योहंसोसोयोसौसोहमित्यत्रसशब्देनपरमात्मोच्यते· हंशब्देनप्रत्यगात्मोच्यते·
अनयोःशब्दयोःसामानाधिकरण्याद्ब्रह्मात्मैक्यमुच्यते·ततश्चसोहमित्यस्यपरमात्माहमित्यर्थोयथातथाश्रवणेस्थापितथाहिसोह
मित्यत्रसकारहकारलोपेकृतेपरिशिष्टयोरभिन्नयोःसंधिंकृत्वोच्चारणेॐमितिशब्दनिष्पन्नः तदुक्तं·सकारंचहकारंचलोपयित्वाप्रयोज
येत्·संधिंचपूर्वरूपाख्यंततोसौप्रणवोभवेदिति·ततश्चोमित्यस्यशब्दस्यपरमात्माहमित्यर्थः सर्वथापिप्रणवजपप्रणवार्थानुसंधानरू
पेणेश्वरप्रणिधानेनपरमेश्वरानुग्रहात्समाधिलाभोभवत्येव·एवंसमाध्यभ्यासेनांतःकरणस्यातिसूक्ष्मतापादनंमनोनाशइत्युच्यते·अ
नेनसूक्ष्मेमनसातत्पदलक्ष्येसाक्षात्कृतेमहावाक्येनस्वस्यब्रह्मत्वसाक्षात्कोभवति·नकेवलंसमाधिनैवब्रह्मसाक्षात्कारःकिंतुविवेके
नापिभवति·अंतःकरणतद्वृत्त्याभासकोयश्चिदात्मासाक्षीतस्मिन्साक्षात्कृतेवाक्यात्ब्रह्मसाक्षात्कारःसंभवत्येवतदाह·द्वौ
क्रमौचित्तनाशस्ययोगोज्ञानंचराघव।योगोवृत्तिनिरोधोहिज्ञानंसम्यगवेक्षणं॥असाध्यःकस्यचिद्योगःकस्यचिज्ज्ञाननिश्चयः।प्रका
रौद्वौततोदेवोजगादपरमेश्वरमितिज्ञानविवेकस्तृतीयाध्याये·इंद्रियाणिपराण्याहुरित्यारभ्यकामरूपंदुरासदमित्यंतेनविवेकं·एषा

तत्वानु॰ २८ का

ध्यायेद्योगं च । यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यत इति वा । देवः परमेश्वरः सर्वज्ञः भगवान् द्वौ प्रकारौ जगादेति श्लोकार्थः । तदेवं
तत्वज्ञानवासनाक्षयमनोनाशाभ्यासाज्जीवन्मुक्तिः सिध्यतीति सिद्धं । तस्या जीवन्मुक्तेः पंच प्रयोजनानि संति ज्ञानरक्षा तपो विसंवादा
भावो दुःखनिवृत्तिः सुखाविर्भावश्चेति । तत्रोत्पन्नब्रह्मसाक्षात्कारस्य पुंसः पुनः संशयविपर्ययानुत्पादो ज्ञानरक्षा । तथा हि । ज्ञानिनां शुकराघ
वविहोदेदीनामिवाकृतोपास्तिज्ञानिनोऽस्मदादेश्चित्तविश्रांत्यभावात्पुनः कदाचित्संशयविपर्ययौ संभवेतां अज्ञानवृत्तावपि मोक्षप्रति
बंधकौ तदाह भगवान् । अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यतीति । ततश्च जीवन्मुक्त्यभ्यासेन संभावितसंशयविपर्ययनिवृत्तिः
ज्ञानरक्षा नाम प्रथमं प्रयोजनं चित्तैकाग्र्यं तपः मनसश्चेंद्रियाणां च ह्यैकाग्र्यं परमं तपः स ज्यायः सर्वधर्मेभ्यः स धर्मपर उच्यत इति स्मरणा
त् । ज्ञानिनो जीवन्मुक्तस्याखिलवृत्तीनामनुदयान्निरंकुशं चित्तैकाग्र्यं संपद्यते । तदेव तपस्तच्च लोकसंग्रहाय भवति तदुक्तं । लोकसं
ग्रहमेवापि संपश्यन्कर्तुमर्हसीति । संग्राह्यो लोकस्त्रिविधः शिष्यो भक्तस्तटस्थश्चेति । तत्र सन्मार्गवान् शिष्यः गुरूपदिष्टमार्गेण श्रव २८
णादिना ब्रह्मसाक्षात्कुर्वन्मुच्यते । आचार्यवान्पुरुषो वेद चरितं यावन्न विमोक्ष्येऽथ संपत्स्यत इति श्रुतेः भक्तोऽपि ज्ञानिनः पूजानपा

नादिनाभीष्टं प्राप्नोति । तथा च श्रुतिः यं लोकं मनसा संभावयति विशुद्धसत्वः कामयते यांश्च कामान् तं तं लोकं जयते तांश्च कामान
स्मादात्मज्ञं ह्यर्चयेद्भूतिकाम इति । स्मृतिरपि । ~~यं लोकं मनसा संभावि~~ यद्येको ब्रह्मविद्भुक्ते जगत्तर्पयतेऽखिलं । तस्माद्ब्रह्मविदे देयं
यद्यस्ति वस्तु किंचनेत्यादि । तटस्थोऽपि द्विविधः सन्मार्गवर्त्यसन्मार्गवर्ती चेति । तत्र सन्मार्गवर्ती मुक्तस्य सदाचारवृत्तिं दृष्ट्वा स्वयमपि
प्रवर्तते । तदाह । यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्तत इति । असन्मार्गवर्ती जीवन्मुक्तस्य दृष्टिपा
तेन सर्वपापैः प्रमुच्यत इति । तथा च स्मृतिः । यस्यानुभवपर्यंता बुद्धिस्तत्वे प्रवर्तते । तद्दृष्टिगोचराः सर्वे मुच्यंते सर्वकिल्बिषैरिति द्वेषिण
स्तु ज्ञानिनो दुःकृतं संभावितं गृह्णंति । तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति । एवं जीवन्मुक्तस्य तपो लोकसं
ग्रहाय भवतीति तपो नाम द्वितीयं प्रयोजनं । जीवन्मुक्तस्याप्युत्थानदशायां कर्मठादिकृतशतनिंदादिश्रवणेऽपि पाखंडीकृतनिष्ठुरादि
दर्शनादावपि चित्तवृत्त्यनुदयाद्विसंवादो न भवति । ज्ञात्वा वयं तत्वनिष्ठा[illegible]नानुमोदामहे वयं । अनुशोचाम एवान्यान् न भ्रांतैर्विवदामह
इति । विसंवादाभावो नाम तृतीयं प्रयोजनं । दुःखनिवृत्तिर्द्विविधा ऐहिकदुःखनिवृत्तिरामुष्मिकदुःखनिवृत्तिश्चेति । तत्र ज्ञानेन भ्रांति
निवृत्तिः तथा योगाभ्यासेनाखिलवृत्तिनिरोधेन चित्तस्यात्मैक्याकारतया ऐहिकसमस्तदुःखनिवृत्तिः प्रारब्धभोगे सत्यपि तथा

तत्वा॰ चश्रुतिः आत्मानंचेद्विजानीयादयमस्मीतिपूरुषइत्यादिना॰ ऐहिकदुःखवृत्तिंमुक्तस्यदर्शयति॰ ज्ञानेनाज्ञाननिवृत्त्या॰ संचितागामिक
२२ र्मणामश्लेषविनाशाभ्यामामुष्मिकदुःखनिवृत्तिर्नामचचतुर्थंप्रयोजनं॰ मुक्तस्यज्ञानयोगाभ्यासाज्ज्ञानतत्कृतावरणविक्षेपनिवृत्त्याबा
धकाभावात्परिपूर्णब्रह्मानंदाद्यनुभवसुखाविर्भावः इममेवार्थंश्रुतिर्दर्शयति॰ समाधिनिर्धूतमलस्यचेतसोनिवेशितस्यात्म
नियत्सुखंभवेत्।नशक्यतेवर्णयितुंगिरातदास्वयंतदंतःकरणेनगृह्यतइति॰ सुखाविर्भावोनामप्रथमंप्रयोजनं॰ एवंस्वरूप
प्रमाणंसाधनफलनिरूपणेनद्विविधामुक्तिर्निरूपिता॰ तस्माद्ब्रह्मविज्जीवन्मुक्तःभोगेनप्रारब्धकर्मणिक्षीणेवर्तमानशरीर
पातेखंडैकरसंब्रह्मानंदात्मनावतिष्ठतेनतस्यप्राणाउत्क्रामंत्यत्रैवसमवलीयंतेब्रह्मैवसन्ब्रह्माप्येतिब्रह्मविद्ब्रह्मैवभवति॰
विभेदजनकेज्ञानेनाशमात्यंतिकंगते॰ आत्मनोब्रह्मणोभेदमसंतंकःकरिष्यति॥सद्भावभावमापन्नस्ततोसौपरमात्मनः॥
भवत्यभेदीभेदश्चतस्याज्ञानकृतोभवेत्यादिश्रुतिस्मृतिशतेभ्यः भगवतासूत्रकारेणाप्युक्तः अस्मिन्नस्यचतद्योगंशास्तीतिसि २२
द्धं नसपुनरावर्तते॰ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।गच्छंत्यपुनरावृत्तिंज्ञाननिर्धूतकल्मषाः इत्यादिश्रुतिस्मृतिभ्यः श्रीम
त्स्वयंप्रकाशात्मगुरुणाकरुणावशात् उपदिष्टंपरात्मैकांतत्वमावेदितंस्यामया १ ब्रह्मेशविष्ण्वादिसमस्तदेवाःस्वस्वाधिकारे

षुविधत्तचित्ताः॥आज्ञावशाद्यस्यवसंति सर्वेतंकृष्णमाद्यंशरणंप्रपद्ये २ याभारतीशेषविरिंचिविष्णुदेवादिभिर्नित्यमुपास्य
मानां॥सदाक्षमालाविलसत्कराभ्यांवाग्वादिनींतांप्रणमामिदेवीं॥ ३ आकाशपुष्पमिवविश्वमहंनिरीक्षेमग्नोस्मिंनि
त्यसुखबोधरसामृताब्धौ॥प्रपंचमद्वयमनंतसुरेवैकबोधंसाक्षात्करोमिपदभावनयागुरूणां ४ यत्पादयुग्मकमलाश्रयणं
विनाहंसंसारसिंधुपतितःसुखदुःखभाक्स्यां॥यत्पादयुग्मकमलाश्रयणात्सुतीर्णस्तंदेशिकांघ्रियुगलंप्रणतोस्मिनित्यं ५
परमसुखपयोधौमग्नचित्तोमहेशांहरिविधिसुरमुख्यान्देशिकादेशमात्रे॥जगदपिनविजानेपूर्णबोधात्मसंवित्सुखतनुरह
मात्मासर्वसंसारशून्यः ६ यदुकुलवररत्नंकृष्णमन्यांश्चदेवान्मनुजपशुमृगादीन्ब्राह्मणादीन्नजाने॥परमसुखसमुद्रेमज्ज
नात्तथयोहंगलि॰तनिखिलभेदःसत्यबोधैकरूपः ७ इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदसरस्वतीपूज्यपूज्य
पादशिष्यभगवन्महादेवसरस्वतीमुनिविरचितंतत्वानुसंधानंसमाप्तं॥ ॥ ॥

132

तत्वानु
२२

२२